# वार्षिकासूत्रणम्

| एककम् | पाठः | मासः | कालांशः |
|---|---|---|---|
| आरण्यकम् | ग्रामकन्यका | जूण् | 12 |
| | वयमेव संरक्षकाः | जूण्-जूलाय् | 12 |
| | इति वार्ताः | जूलाय् | 13 |
| आनन्दकम् | गद्दिका | आगस्ट् | 13 |
| | धीरो दूतः | सेप्टम्पर्-ओक्टोबर् | 15 |
| | सव्यसाची | ओक्टोबर् | 13 |
| आधेयकम् | समे समाः | नवम्पर् | 14 |
| | राराज्यमानं ध्रुवतारकम् | नवम्पर्-डिसम्पर् | 12 |
| आदर्शकम् | निकटस्थः कः? | जनुवरि | 13 |
| | अहन्यहनि बोद्धव्यम् | फेब्रुवरि | 14 |
| | मूल्यनिर्णयः | मार्च् | |

# पाठासूत्रणमातृका

| | |
|---|---|
| पाठस्य नाम | : |
| दिनाङ्कः | : |
| आशयः | : |
| उपाशयः | : |
| व्यवहाररूपम् | : |
| उद्देश्यानि/लक्ष्याणि | : |
| मूल्यम्/ मनोभावः | : |
| पठनलक्ष्याणि | : |
| पठनक्षमता | : |
| अध्ययनसामग्र्यः | : |
| प्रतीक्षितानि उत्पन्नानि | : |
| कालांशः | : |

| प्रवर्तनपुटम् | प्रतिकरणपुटम् |
|---|---|
| | |

प्रधानाध्यापकस्य हस्ताक्षरम्                    शिक्षकस्य हस्ताक्षरम्

प्रतिफलनात्मिका चिन्ता

| |
|---|
| |

मम निरीक्षणानि, मम प्रत्यभिज्ञाः

1

2

3

अनुवर्तमानानि प्रवर्तनानि, परिहारप्रवर्तनानि च ।

1

2

3

# आरण्यकम्

पाठः 1

# ग्रामकन्यका

| | | |
|---|---|---|
| आशयः | - | प्रकृतिः |
| उपाशयः | - | प्रकृतिसंरक्षणम् |
| व्यवहाररूपम् | - | बालकविता |
| उद्देश्यानि/ लक्ष्याणि | - | प्रकृतिः रक्षणीया इति जानाति। प्रकृतिसंरक्षणं सर्वेषां दायित्वमिति जानाति। |
| मूल्यम् / मनोभावः | - | नदीसंरक्षणम्, कृषिसंरक्षणम्, वायुसंरक्षणम् इत्यादीनि अस्माकं दायित्वम्। |
| पठनलक्ष्याणि | | |
| आशयपराणि | - | कवितायाः आशयान् चिनोति। |
| | - | आशयं स्ववाक्यैः लिखति। |
| | - | प्रकृतिसंरक्षणस्य उपायान् विचार्य लघुटिप्पणीं लिखति। |
| भाषापराणि | - | कवितां तालानुसारम् आलपति। |
| | - | क्रियापदानि उपयुज्य नूतनवाक्यानि रचयति। |
| | - | णिजन्तानि पदानि चिनोति। |
| | - | समानार्थकपदानि लिखति। |
| पठनक्षमता | - | आलपनसामर्थ्यं वर्धते। |
| | - | लेखनसामर्थ्यं वर्धते। |
| कालांशः | - | 12 |

**पाठस्य आमुखम्**

अस्मान् परितः विद्यमानेषु प्रत्येकं वस्तुषु अपि सौन्दर्यं वैविध्यं च वर्तते। प्रकृतिः अतीव चारुतया एव सर्वान् संरक्षति। तथा सूर्योदयः, मन्दमारुतः, मेघवर्षणम्, ऋतवः इत्येवं सर्वमपि प्रकृतेः चारुतां वर्धयति। तादृशं सौन्दर्यं लोकान्तं यावत् अस्माभिः रक्षणीयं भवति। तदर्थं सर्वमपि यथातथं संरक्षणीयमेव। परिस्थितेः संरक्षणं समेषां दायित्वमिति अवगच्छामः। तत्प्रतिपादिकामेकां कवितां पठामः।

**प्रवेशकप्रवर्तनम्**

प्रकृतिसौन्दर्यं प्रकाशयतः कस्यचित् चित्रस्य प्रदर्शनं करोति। (चित्रं प्रदर्शयति)। सौन्दर्यं कथं प्रतीयते? तस्याः सौन्दर्यं परिपालयितुं किं कर्तुं शक्यते ? सौन्दर्यं विना प्रकृत्याः अवस्था कीदृशी भवेत्? इत्यादीन् प्रश्नान् उन्नीय प्रवेशकप्रवर्तनं करणीयम्।

**पाठापग्रथनम्**

कस्यचन ग्रामस्य सौन्दर्यं वर्णयित्वा, ग्रामसौन्दर्यस्य परिपालनम् अस्माकं कर्तव्यम्, तद् वयं निश्चयेन कुर्मः इति बोधयति ग्रामकन्यका नाम कविता। बाल्यादेव वयं परिशीलितवन्तः यत् प्रभातस्य वर्णने तु पर्वतोपरि सूर्यबिम्बः तथा पक्षिकुलानां कलकलरवः भवति इति। कवितेयमपि तद्वदेव आरभ्यते।

पूर्वस्मिन् दिग्विभागे पर्वतराजः कनकं (स्वर्णं) तापयति (सूर्यः उदयते)। तदा कोकिलपोतः मधुरं गानं श्रावयति (पिककुलं कलकलनादं करोति)। ग्रामसुतायै शैवलिनी दर्पणवेषं तनुते (ग्रामे निर्मला नदी प्रवहति)। ग्रामसुतायै ग्रामसखी रजनी निकामम् अञ्जनलेपं ददाति (रात्रिः ग्रामस्य कृते अलङ्कारकारणं भवति चोरमारणाद्यक्रमराहित्यात्)।

श्याममेघः मुक्तकसदृशैः जलकणैः भूमिं तोषयति (यथाकालं ग्रामे वृष्टिः जायते)। ग्रामममुं पङ्किलपादः स्वर्गतुल्यं कुरुते (कर्षकाः ग्रामं समृद्धिं प्रापयन्ति)। दीपपतिः कर्षणभूमौ काञ्चनचेलां वयते (सूर्यप्रकाशे केदाराः सुवर्णकौशेयमिव शोभन्ते)। सौरभवाहः माधवहारं धरणीं धारयति (सुरभिलवायुः वासन्तपुष्पाणि भूमौ पातयति)।

सर्वं बहुप्रयत्नेन वसुधाम् अशेषं भूषयति (भूमौ विद्यमानाः सर्वे चराचराः स्वप्रयत्नेन भूमेः सौन्दर्यपरिपालनाय यतन्ते)। तादृशभूमेः पालनकार्यं वयं नियतं कलयामः (स्वभावतः सुन्दर्याःभूमेः सौन्दर्यं परिपालयितुं प्रकृतिं नितरां संरक्षितुं च वयं निश्चयेन प्रयत्नं कुर्मः)।

ग्रामकन्यका नाम कवितायाः वाचनतः उपर्युक्तः आशयः सामान्येन अवगम्यते। किन्तु कक्षायां प्रत्येकं पङ्क्तिं पुरस्कृत्य प्रकृतिसंरक्षणाय चर्चा अध्यापकेन करणीया भवति।

पर्वतराजः कनकं तापयति इत्यत्र पर्वतनशीकरणमधिकृत्य विचारः विधेयः। कोकिलपोतः मङ्गलगानं श्रावयति इत्यत्र पक्षिकुलानां आवासकेन्द्रस्य वनप्रदेशस्य दुरवस्थामधिकृत्य चर्चा कार्या।

ग्रामसुतायै दर्पणवेषं तनुते शैवलिनी इत्यत्र नदीनां शोच्यावस्थां प्रतिपाद्य नदीसंरक्षणस्य उपायान् विचारयितुं अवसरः कल्पनीयः। पङ्किलपादो नाकसमानं कुरुते ग्राममिमम् इत्यत्र ग्रामस्य समृद्ध्यां कर्षकाणां योगदानमधिकृत्य तथा च कृषिसंरक्षणाय किं किं कर्तुं शक्यते इत्यस्य च विचाराय समयः प्रदेयः। सौरभवाहो माधवमाल्यं धरणीं धारयति इत्यत्र वायुमलिनीकरणमधिकृत्य चर्चा कार्या।

एवं कवितायां परोक्षतया परामृष्टानाम् अंशानां विचाराय कक्षायाम् अवसरं प्रदाय प्रकृतिसंरक्षणस्य सन्देशः छात्रेभ्यः दातव्यः। तदेवास्य पाठस्य उद्देश्यम्।

## पठनप्रवर्तनानि

**प्रवर्तनम् – 1 बालकविताम् आलपति।**

पठनलक्ष्यम् – ताललयानुसारम् उच्चारणस्फुटतया आलपनसामर्थ्यं सम्पादयति।

बालकवितां विविधैः तालैः छात्राः आलपन्ति।

**मूल्यनिर्णयसूचकानि**

उचितः तालः । उचिता अवतारणशैली । उच्चारणशुद्धिः ।

**प्रवर्तनम् 2 कविताभागं चित्वा लिखति।**

पठनलक्ष्यम् – आशयं प्रतिजानाति।

कवितायाम् आलङ्कारिकतया प्रतिपादिताः आशयाः दत्ताः सन्ति। तेषां कविताभागं स्वीकृत्य लिखन्ति।

| | | |
|---|---|---|
| आशयः | - | सूर्यः उदयते। |
| कविताभागः | - | पूर्वस्यां दिशि पर्वतराजः कनकं तापयति। |
| आशयः | - | ग्रामे निर्मला नदी प्रवहति। |
| कविताभागः | - | ग्रामसुतायै दर्पणवेषं तनुते शैवलिनी। |
| आशयः | - | मेघाः काले काले वर्षन्ति। |
| कविताभागः | - | श्यामपयोदो मुक्तकनीरैरवनिं तोषयति। |
| आशयः | - | कर्षकः ग्रामं समृद्धं करोति। |
| कविताभागः | - | पङ्किलपादो नाकसमानं कुरुते ग्राममिमम्। |
| आशयः | - | सूर्यप्रकाशे केदाराः सुवर्णशोभया राजन्ते। |

कविताभागः - कर्षणभूमौ काञ्चनचेलां वयते दीपपतिः।
आशयः - वायोः आगमनेन पुष्पाणि भूमौ पतन्ति।
कविताभागः - सौरभवाहो माधवमाल्यं धरणीं धारयति।
आशयः - प्रकृतिसंरक्षणं कुर्मः।
कविताभागः - तादृशभूमेः पालनकार्यं कलयामो नियतम्।

**मूल्यनिर्णयसूचकानि**

आशयावगमः । उचितं योजनम् । विशकलनसामर्थ्यम् ।

**प्रवर्तनम् 3 क्रियापदचयनम्। नूतनवाक्यलेखनम्।**

पठनलक्ष्यम् - क्रियावगमनसामर्थ्यं वाक्यलेखनसामर्थ्यं च प्राप्नोति।

कवितायाः क्रियापदानि चित्वा लिखति। तापयति, श्रावयति, तनुते, राति, तोषयति, कुरुते, वयते, धारयति, भूषयति, कलयामः।

क्रियापदानि उपयुज्य नूतनवाक्यानि रचयति।

1. माता महानसे जलं तापयति।
2. मातामही बालकं कथां श्रावयति।
3. अमल्कुमार् नाटके मन्त्रिणः वेषं तनुते।
4. मातुलः अनुजायै कङ्कणं राति।
5. अध्यापकः पुरस्कारं प्रदाय विजयिनं तोषयति।
6. उद्यानं गृहे चारुतां कुरुते।
7. तन्तुवायः वस्त्राणि वयते।
8. ज्येष्ठः अनुजं युतकं धारयति।
9. विवाहदिने सोदरी नववधूं भूषयति।
10. परस्थितिदिने वयं वृक्षरोपणं कलयामः।

**मूल्यनिर्णयसूचकानि**

उचितवाक्यप्रयोगः । वाक्यघटना । क्रियापदस्वीकारः।

**प्रवर्तनम् 4 णिजन्तपदचयनम्।**

पठनलक्ष्यम् - णिजन्तपदानां परिचयं सम्पादयति।

मञ्जूषायां णिजन्तपदानि, इतराणि पदानि च दत्तानि। तेभ्यः णिजन्तपदानि चित्वा लिखति। णिच् प्रत्ययान्तानि पदानि भवन्ति णिजन्तपदानि। णिच्प्रत्ययः प्रेरणार्थे स्वार्थे चे प्रयुज्यते। पठ् धातोः प्रेरणार्थे णिच् प्रत्यये पाठयति इति रूपम्। तद्वत् चुरादिगणे स्वार्थे च णिच्प्रत्ययस्य प्रयोगः दृश्यते यथा चुर् धातोः चोरयति इति रूपम्।

| **णिजन्तम् पदम्** | **अणिजन्तं पदम्** |
|---|---|
| चोरयति | लिखति |
| कर्षयति | पतति |
| प्रेरयति | गच्छति |
| प्रवेशयति | नटति |
| नादयति | |

**मूल्यनिर्णयसूचकानि**

णिजन्तपदज्ञानम् । उचितं चयनम् । अर्थावबोधः ।

**प्रवर्तनम् 5 समानार्थकपदचयनम्**

पठनलक्ष्यम् - भूमिशब्दस्य पर्यायपदानि अवगच्छति।

कविताभागात् भूमि इत्यर्थकानि पदानि चित्वा लिखति।

अवनिः, धरणी, वसुधा, भूमिः।

भूशब्दस्य समानार्थकपदानि

भूः – भूमिः, पृथ्वी, क्ष्मा, मेदिनी, मही, कुः, धरा, धरित्री, वसुन्धरा।

**मूल्यनिर्णयसूचकानि**

समानार्थकपदज्ञानम् । अर्थावबोधः । चयनसामर्थ्यम् ।

**प्रवर्तनम् 6 कवितायाः आशयलेखनम् ।**

पठनलक्ष्यम् - स्ववाक्यैः आशयलेखनाय सामर्थ्यं सम्पादयति।

ग्रामीणशोभां प्रतिपाद्य प्रकृतिसंरक्षणस्य सन्देशम् उद्बोधयति ग्रामकन्यका नाम कविता। पर्वतोपरि पूर्वस्मिन् भागे सूर्यः उदयते। तदानीं पक्षिकुलं कलकलनादैः मुखरीकरोति। ग्रामे नद्यां निर्मलं

जलं प्रवहति। रात्रिरपि अतीव शोभावहा भवति। यथाकालं मेघाः शुद्धं जलं वर्षन्ति। कर्षकाः ग्रामस्य समृद्धिं वर्धयन्ति। परिपक्वव्रीहिषु सूर्यकिरणस्पर्शेन सुवर्णशोभा प्रसरति। माधवर्तौ सुगन्धवाहः पवनः वाति। तदा भूमौ पुष्पाणि पतन्ति। एवं वसुधायां सर्वे मनोहारितया वर्तन्ते। तादृशभूमेः परिपालनम् अस्माकं दायित्वमिति च कविता बोधयति।

**मूल्यनिर्णयसूचकानि**

आशयव्यक्तता । वाक्यघटना । भाषाशुद्धिः ।

**प्रवर्तनम् 7 लघुटिप्पणीलेखनम्।**

पठनलक्ष्यम् - परिस्थितिसंरक्षणस्य उपायान् अवगच्छति।

ग्रामकन्यका नामकेऽस्मिन् पाठभागे पर्वतसंरक्षणम्, वनसंरक्षणम्, नदीसंरक्षणम्, कृषिसंरक्षणम्, वायुसंरक्षणम् च परोक्षतया प्रतिपादयति। एतेषां संरक्षणाय आधुनिककाले उपायाः विचिन्तनीयाः भवन्ति। परिस्थितेः सुस्थितौ पर्वतानां भागित्वम् अतुलमेव। पर्वतेभ्यः मृत्पाषाणादीनां खननद्वारा नैकाः समस्याः जायन्ते। ताः परिहार्याः एव। वनप्रदेशान् विनाश्य भवनादीनां निर्माणादिकं कुर्वन्ति। तद्वारा जीवजालानां वासव्यवस्था दुष्करा जायते। वननशीकरणं नैव कार्यमिति चिन्ता पाठनीया एव।

ग्रामेषु नगरेषु च विद्यमानाः नद्यः अधिकाः विमलाः न भवन्ति। पलास्तिकादि मालिन्यानि, कार्याशालाभ्यः बहिर्गतानि मालिन्यानि च नदीषु निगीर्य जलं कलुषितं जायते। जलमलिनीकरणं महान् दोषः एव। सः परिहार्यः। निर्मला नदी परिस्थितेः सुस्थितये उपकाराय भवति। तथा च वायोः मलिनीकरणविषये अपि उपायाः विचिन्त्य परिहारं पश्यामः। शुद्धवायोः सौलभ्यम् अचिरादेव न्यूनीभविष्यति। सम्प्रति मुखावरणं विना बहिर्गमनमपि आरोग्यनाशाय कारणं भवति। अतः वायुमलिनीकरणे वयं भागभाजः न भवामः इति निश्चिनुमः। विषवातकानां बहिर्गमनं निवारयितुं शास्त्रीयमार्गा आविष्करणीयाः।

कृषिसंरक्षणे युवानः श्रद्धालवः भवेयुः। कृषिः जीवनकारणं भवति। आधुनिकाः कृषिकर्मणि विमुखाः दृश्यन्ते। तेषु कृषिकरणे तात्पर्यम् उत्पादयितुं च यत्नः विधेयः। एवं प्रकृतेः सौन्दर्यसंरक्षणे वयमपि प्रतिज्ञाबद्धाः भवामः।

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

प्रकृतिः पाति पाल्या च।

प्रकृतिः सर्वान् चराचरान् परिपालयति। तद्वत् प्रकृतिः अस्माभिः सर्वाभिः परिपाल्या च भवति। प्रकृतौ विद्यामानानां समेषां विभवानां संरक्षणं यथा अस्माभिः क्रियते तथा एव प्रकृतिः स्वविभवैः सर्वान् परिपालयितुं शक्नोति इति सर्वे अवगच्छेयुः। वयमेव संरक्षकाः इति अग्रिमे पाठे वनसंरक्षणमेव प्रतिपाद्यः।

## अनुबन्धः

### गद्यक्रमः

**पूर्वस्यां दिशि .........**

पर्वतराजः पूर्वस्यां दिशि कनकं तापयति। कोकिलपोतः मङ्गलगानं मधुरं श्रावयति।

**ग्रामसुतायै ........**

शैवलिनी ग्रामसुतायै दर्पणवेषं तनुते । ग्रामसखी रजनी (ग्रामसुतायै) अञ्जनलेपं निकामं राति।

**श्यामपयोदो.........**

श्यामपयोदः मुक्तकनीरैः अवनिं तोषयति। पङ्किलपादः अमुं ग्रामं नाकसमानं कुरुते।

**कर्षणभूमौ .........**

दीपपतिः कर्षणभूमौ काञ्चनचेलां वयते। सौरभवाहः धरणीं माधवमाल्यं धारयति।

**सर्वमशेषं .............**

सर्वं वसुधां यत्नसमेतम् अशेषं भूषयति। (अतः वयं) तादृशभूमेः पालनकार्यं नियतं कलयामः।

**विवर्तनम्**

कवितायाः प्रादेशिकविवतर्नम् अत्र दीयते। विवर्तकः डा.हरिप्रसाद् कटम्पूर् भवति।

**കിഴക്കുദിക്കിൽപർവ്വതരാജൻ**
**കനകമുരുക്കുന്നു.**
**കുയിലിൻ കുഞ്ഞൊരു മംഗളഗാനം**
**മധുരം പാടുന്നു**

**ഗ്രാമമകൾക്കായ് നീർക്കണ്ണാടി-**
**യൊരുക്കുന്നു തടിനീ**
**തോഴിയിവൾക്കായ് നീലാഞ്ജനമഷി**
**യേകുന്നു രജനീ**

നീർമണിമുത്താൽ കാർമുകിൽ ഭൂവിന്
മോദമതേകുന്നു
ചേറണിയുന്നൊരു കർഷകർ മണ്ണിനെ
വിണ്ണായ് മാറ്റുന്നു

വയലേലകളിൽ പൊന്നുടയാടകൾ
നെയ്യുന്നു സൂര്യൻ
ഇളയുടെ മാറിൽ മാധവമാല്യം
ചാർത്തുന്നു പവനൻ

ഒത്തൊരുമിച്ചിവർ മണ്ണിനെയാകെ-
യൊരുക്കുന്നീവണ്ണം
ഇത്തിരുഭൂവിനെ നമ്മളുമിനിമേൽ
കാത്തിടുമീവണ്ണം

**अलङ्कारविचारः**

कवितायामस्याम् उत्प्रेक्षालङ्कारः विद्यते। बहुत्र पङ्क्तिषु उपमेये उपमानस्य सम्भावना दृश्यते। यत्र प्रस्तुते अप्रस्तुतस्य सम्भावना भवति तत्र वस्तूत्प्रेक्षा। यथा –पूर्वस्यां दिशि पर्वतराजः कनकं तापयति। अत्र पूर्वस्यां दिशि पर्वतस्योपरि सूर्य उदयते इत्यर्थः। कवितायां सूर्योदयं पर्वतराजस्य कनकतापनमिति उत्प्रेक्ष्यते। एवम् इतरत्र च चिन्तनीयम्।

पाठः 2

# वयमेव संरक्षकाः ।

| | | |
|---|---|---|
| आशयः | - | प्रकृतिः |
| उपाशयः | - | वनम् |
| व्यवहाररूपम् | - | कथा |
| उद्देश्यानि/ लक्ष्याणि | - | वनसम्पदः संरक्षणं प्रकृतिसंरक्षणस्य भाग एव इति जानाति। |
| | - | वन्यमृगाणामाश्रयकेन्द्रं भवति वनमिति अवगच्छति। |
| मूल्यम्/ मनोभावः | - | प्रकृतेः अविभाज्यः भाग एव वनमिति। |
| | - | वनविभवानां संरक्षणं सर्वेषां दायित्वमिति। |
| पठनलक्ष्याणि | | |
| आशयपराणि | - | आशयं गृहीत्वा कथास्तम्भं क्रमीकरोति। |
| भाषापराणि | - | क्रियापदानि चित्वा लिखति। |
| | - | अव्ययपदानि चित्वा लिखति। |
| | - | लट् लकारं लङ् लकारेण परिवर्तयति। |
| | - | यदा-तदा उपयुज्य वाक्यं परिवर्तयति। |
| पठनक्षमता | - | रचनासामर्थ्यं वर्धते। |
| | - | लङ् लकारज्ञानं जायते। |
| | - | क्त्वान्तल्यबन्ततुमुन्नन्ताद्यव्ययानां ज्ञानं वर्धते। |
| कालांशः | - | 12 |

**पाठस्य आमुखम्**

नानाविधाभिः वृक्षलतादिभिः जीवजालैः च सम्पन्नं भवति वनप्रदेशः। पृथिव्याः 30(त्रिंशत्) प्रतिशतं भागः वनमेव। अनेकेषां जीविवर्गाणाम् आवासस्थानं भवति वनम्। मृत्-जल-वाय्वादीनां

संरक्षणं निर्वहति वनम्। अत एव जैवमण्डलस्य महत्वपूर्णं घटकं भवति वनम्।

"यत्ते भूमे विखनामि क्षिप्रं तदपि रोहतु
मा ते मर्म विमृग्वरि मा ते हृदयमर्पितम्॥"

(ഹേ ഭൂമി, ഞാൻ നിന്നിൽ നിന്ന് വെട്ടിയും കുഴിച്ചും എന്തുതന്നെ എടുക്കുന്നുവോ അവയെല്ലാം വേഗത്തിൽ തന്നെ തഴച്ച് വളരുമാറാകട്ടെ, ഞാൻ അവിടത്തെ മർമ്മങ്ങളെ പിളർക്കാതിരിക്കട്ടെ, ഹൃദയത്തെ മുറിക്കാതിരിക്കട്ടെ.)

**पाठापग्रथनम्**

'वयमेव संरक्षकाः' इति लघुकथा वनस्य प्राधान्यम् अधिकृत्य छात्रान् उद्बोधयति। कथायामस्यां मृगाः पक्षिणः च कथापात्राणि भवन्ति। वनस्य नशीकरणं कर्तुम् उद्युक्तस्य मानवस्य प्रवर्तनेन कस्यचित् मयूरस्य नीडं नष्टम् अभवत्। दुःखितस्य तस्य नष्टं समेषां वनजीविनां नष्टमेवेति विज्ञाय वनसंरक्षणाय मृगाः एकीभूय प्रतिरोधं रचयन्ति। मृगाणाम् आक्रमणमुखात् मानवः पलायितः अभवत्। वनमेव अस्माकं रक्षणं करोति, अतः वनस्य संरक्षकाः वयमेव इति मृगाः उच्चैः वदन्ति। सन्देशममुं ललितया रीत्या अनेन पाठभागेन उद्बोधयति।

जीवनमूल्यानां सद्यः उद्बोधनं कथया एव साध्यं भवति। स्वसौन्दर्येण गर्विष्ठः मयूरः, दूतवाहकः काकः, काष्ठकृन्तकः मानवः, भग्नस्य नीडस्य चित्रम्, गर्विष्ठाय अपि मयूराय साहाय्यं कर्तुं दृढनिश्चिताः काननमृगाः, तेषां स्ववर्गबोधः, सर्वेषाम् आक्रमणं सोढुमसमर्थः धावितवान् मानवः, अनुतापविवशः मयूरः च कथायाः आत्मांशप्रकाशकाः बिम्बाः भवन्ति।

प्रकृतेः प्रकृतिविभवानां च संरक्षणम् अस्माकं कर्तव्यमेव इति इयं कथा अस्मान् उद्बोधयति। आदिकालादारभ्य सर्वे मानवाः पशुपक्षिणश्च वनमाश्रित्यैव जीवन्ति। वनं विना जीवनं दुष्करं भवेत्। प्रकृतेः सन्तुलितावस्थायै वनं वनविभवाश्च सुप्रधानं दायित्वं निर्वहन्ति। तदर्थं अस्माभिः मिलित्वा स्थातव्यमिति आशयं कथेयं अस्मान् उद्बोधयति।

**चित्राणां विशदीकरणम्**

चित्राणि कथायाः गतिमनुसृत्यैव सज्जीकृतानि। चित्रकथारूपेण एव पाठभागं अग्रे गच्छति इत्यतः चित्राणि अत्यन्तम् उपकारकाणि भवन्ति। कथायाः स्पष्टीकरणाय इमानि पर्याप्तानि च। अत एव तेषां चित्रणं स्पष्टमेव।

## पठनप्रवर्तनानि

**प्रवर्तनम् 1 क्रियापदचयनम्, नूतनवाक्यलेखनम्।**

पठनलक्ष्यम् - क्रियापदचयनसामर्थ्यं नूतनवाक्यलेखनसामर्थ्यं च आर्जयति ।

(रोदिति, सञ्चरति स्म, नाशयति, आसीत्, परिहसति, शक्नोति, अवदत्, अभवत्, अङ्गीचक्रुः, आक्रमितवन्तः, अकरोत्, समाश्वासितवन्तः, अपतन्)

1. भग्नं क्रीडनकं दृष्ट्वा बालः **रोदिति।**
2. अध्यापिका/अध्यापकः छात्रान् निरीक्षितुं सर्वत्र विद्यालये **सञ्चरति स्म।**
3. उन्मादकवस्तूनाम् उपयोगः मानवान् **नाशयति।**
4. सूर्यवंशे दशरथो नाम राजा **आसीत्।**
5. चाक्यार् सामाजिकान् **परिहसति।**
6. गजः अधिकं भारं वोढुं **शक्नोति।**
7. माता पुत्रम् **अवदत्।**
8. प्रयत्नेन सः उद्योगं प्राप्तवान् **अभवत्।**
9. सामाजिकाः बालस्य विपदि धैर्यम् **अङ्गीचक्रुः।**
10. शत्रुसैनिकाः अस्माकं सैनिकान् **आक्रमितवन्तः।**
11. रुग्णां बालिकां सर्वे **समाश्वासितवन्तः।**
12. परीक्षायै सः कठिनं प्रयत्नम् **अकरोत्।**
13. वृक्षात् पर्णानि **अपतन्।**

**मूल्यनिर्णयसूचकानि**

क्रियापदानां चयनम् । अर्थावबोधः। उचिता वाक्यघटना ।

**प्रवर्तनम् 2 कथास्तम्भस्य क्रमीकरणम्।**

पठनलक्ष्यम् - आशयग्रहणसामर्थ्यं वर्धते।

अत्र कथायाः आशयाः क्रमं विना दत्ताः सन्ति। तान् आशयान् क्रमीकृत्य कथास्तम्भं रचयति।

- वने कश्चन मनोहरः मयूरः अस्ति।
- स्वसौन्दर्येण गर्विष्ठः मयूरः सदा सर्वान् परिहसति स्म।
- मानवः मयूरस्य नीडं नाशयति।
- सर्वे मयूरं समाश्वासितवन्तः।
- मृगाः वनस्य संरक्षणं तेषां कर्तव्यमिति मन्वते।

**मूल्यनिर्णयसूचकानि**

आशयग्रहणम् । वाक्यघटना । भाषाप्रयोगः।

**प्रवर्तनम् 3 पाठभागात् क्त्वान्त-ल्यबन्त-तुमुन्नन्ताव्ययानां पदानां पट्टिकाकरणम्।**

पठनलक्ष्यम् - क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि पदानि विविच्य जानाति।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| गृहीत्वा | अपहृत्य | स्थापयितुम् |
| चिन्तयित्वा | आगत्य | कर्तुम् |
| पतित्वा | एकीभूय | सोढुम् |
| श्रुत्वा | | |
| दृष्ट्वा | | |

**मूल्यनिर्णयसूचकानि**

अव्ययावबोधः। पट्टिकाकरणसामर्थ्यम्। प्रत्ययानामवगमः।

**क्त्वान्तप्रयोगः**

धातुना सह क्त्वान्तमुपयुज्यते। द्वयोः वाक्ययोः योजनाय क्त्वान्तप्रत्ययः उपयुज्यते। अत्र वाक्यद्वयेऽपि कर्ता एक एव भवेत्। द्वयोः क्रियापदयोः पूर्वतरेण सह क्त्वाप्रत्ययः। भूतकालार्थे एव क्त्वान्तप्रत्ययप्रयोगः। यथा गत्वा, नत्वा, मत्वा इत्यादीनि। 'समानकर्तृकयोः पूर्वकाले' इति सूत्रम्। अत्र उपसर्गरहितैः धातुभिरेव क्त्वान्तप्रत्ययः।

**ल्यबन्तप्रयोगः**

धातुना सह ल्यबन्तप्रत्ययः उपयुज्यते। सः उपसर्गयुक्तैः धातुभिः सहैव प्रयोक्तव्यः। सोपसर्गधातुभिः योगे भूतकाले क्त्वा प्रत्ययस्य ल्यप् प्रत्ययः भवति। यथा प्रपठ्य, प्रहस्य, आगत्य, प्रणम्य इत्यादीनि। सूत्रम् – 'समासेऽनञ् पूर्वेत्वे ल्यप्'।

**तुमुन्नन्तप्रयोगः**

क्रियान्तरस्य सिद्ध्यर्थम् अन्या क्रिया यत्र प्रयुज्यते तत्र साध्यक्रियया सह तुमुन् प्रत्ययः भवति। सा क्रिया तु भविष्यर्थबोधिनी च भवति। यथा स्नातुं गच्छति। पठितुं प्रयतते। अत्र सोपसर्ग-उपसर्गरहितधातुभिः सह तुमुन् भवितुमर्हति। यथा कर्तुम्, सत्कर्तुम् इत्यादि।

**प्रवर्तनम् 4 यदा-तदा उपयुज्य वाक्यानां परिवर्तनम्।**

पठनलक्ष्यम् - यदा –तदा प्रयोगस्य ज्ञानं सम्पादयति।

वाक्यद्वयं यदा –तदा उपयुज्य परिवर्तयति।

1. यदा रोगः जायते तदा आतुरालयं प्रविशति।
2. यदा कालः गच्छति तदा परिणामः सम्भवति।

3. यदा अन्धकारः व्याप्नोति तदा दृष्टिः मन्दीभवति।
4. यदा माता क्षीरम् अदात् तदा बालकः रोदनम् अवसितवान्।
5. यदा पुत्रस्य सन्देशः आगतः तदा पिता सन्तुष्टः अभवत्।

**मूल्यनिर्णयसूचकानि**

उचिता वाक्यघटना। यदा – तदा प्रयोगस्य साधुता। अर्थाववोधः।

**प्रवर्तनम् 5 लकारपरिवर्तनम्।**

पठनलक्ष्यम् - लङ् लकारज्ञानं वर्धते।

लट् लकारे दत्तानि वाक्यानि लङ् लकारेण परिवर्तयति।

1. अरुणिमा गीतम् अगायत्।
2. फिरोस् शीघ्रम् अधावत्।
3. कत्रीना वाहनं मन्दम् अचालयत्।
4. प्रशान्तः मित्राय पुस्तकम् अददात्।

**मूल्यनिर्णयसूचकानि**

लकारज्ञानम्। अर्थावबोधः। वाक्यघटना।

**प्रवर्तनम् 6 ग्रन्थकाराणां कृतीनां च पट्टिकाकरणम्।**

पठनलक्ष्यम् - गद्यसाहित्ये प्रसिद्धनां ग्रन्थानां कवीनां च परिचयं सम्पादयति।

अनुबन्धे प्रदत्तानां ग्रन्थानां ग्रन्थकाराणां विवरणं पठित्वा पट्टिकां रचयति।

| ग्रन्थकारः /ग्रन्थकर्ता | ग्रन्थः /कृतिः |
|---|---|
| सुबन्धुः | वासवदत्ता |
| दण्डिः | दशकुमारचरितम् |
| बाणभट्टः | कादम्बरी |

**मूल्यनिर्णयसूचकानि**

ग्रन्थकाराणां ज्ञानम्। ग्रन्थानां ज्ञानम्। उचितं पट्टिकाकरणम्।

**अग्रिमपाठसंयोजकप्रवर्तनम्**

अवाच्यवृत्तिर्हि भूमेः, रक्ष्या सन्तुलिता स्थितिः।

भूमेः प्रवृत्तिः अनिर्वचनीया भवति। अग्रिमनिमेषे भूमौ किं सम्भवतीति प्रवक्तुं केनापि न शक्यते। अतः भूमेः सन्तुलिता स्थितिः अस्माकं सुस्थितये संरक्षणीया भवति। अन्यथा प्रकृतिदुरन्ताः भवितुमर्हन्तीति वाक्यस्यास्य आशयः। इति वार्ताः इति अग्रिमपाठे प्रकृतिदुरन्तमधिकृत्य विचारः क्रियते।

## अनुबन्धः

**व्याकरणविशेषः**

विना शब्दयोगे द्वितीया, तृतीया, पञ्चमी वा स्युः। 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्' इति सूत्रेण।

द्वितीया – जलं विना मत्स्याः न जीवन्ति।

तृतीया – लेखनेन विना पठनं सुकरं न भवति।

पञ्चमी - यानात् विना दूरयात्रा दुष्करा भवति।

'लट् स्मे' इति सूत्रेण स्मयोगे भूतानन्द्यतनपरोक्षे लट् भवति। लट् लकारयुक्तेन पदेन सह 'स्म' इति योजयति चेत् भूतकालार्थः लभ्यते।

| | | |
|---|---|---|
| सञ्चरति स्म | - | समचरत् |
| चलति स्म | - | अचलत् |
| वसति स्म | - | अवसत् |
| पृच्छति स्म | - | अपृच्छत्। |

'पृष्ठतः' शब्दस्य योगे षष्ठी विभक्तिः भवति। 'षष्ठ्यतसर्थप्रत्ययेन' इति सूत्रेण।

उदा - विद्यालयस्य पृष्ठतः नदी प्रवहति।
मम पृष्ठतः कपाटिका अस्ति।
मन्दिरस्य पृष्ठतः केदारः वर्तते।
गृहस्य पृष्ठतः कूपः अस्ति।

**पदच्छेदः**

| | |
|---|---|
| वर्षाकार्मुकम् + इव | = वर्षाकार्मुकमिव |
| कः +अपि | = कोऽपि |
| कुर्वन् + आसीत् | = कुर्वन्नासीत् |
| भग्नम् + अभवत् | = भग्नमभवत् |
| अन्यतमः + अस्ति | = अन्यतमोऽस्ति |
| कर्तव्यम् + एव | = कर्तव्यमेव |
| इति + अवदत् | = इत्यवदत्। |

**क्रियापदानि**

मन् अवबोधने (तनादिः आत्मनेपदी सकर्मकः सेट्  कर्तरि लट्)

| | ए.व. | द्वि.व. | ब.व. |
|---|---|---|---|
| प्र.पु. | मनुते | मन्वाते | मन्वते |
| म.पु. | मनुषे | मन्वाथे | मनुध्वे |
| उ.पु. | मन्वे | मनुवहे/मन्वहे | मनुमहे/मन्महे। |

**नामपदानि**

मम - दकारान्तः त्रिषु लिङ्गेषु समानः अस्मद् शब्दः,ष.ए.व.।

नीडम् - अकारान्तः नपुं.प्र.ए.व.।

पशवः - उकारान्तः पुं.प्र.ब.व.।

द्रुमाः - अकारान्तः पुं.प्र.ब.व.।

**पर्यायपदानि**

मयूरः – बर्हिणः, बर्ही, नीलकण्ठः, भुजङ्गभुक्।

बर्हम् – दलम्, मयूरपिच्छम्।

काकः – करटः, अरिष्टः, बलिपुष्टः, सकृत्प्रजः, ध्वाङ्क्षः, वायसः, बलिभुक् ।

मानवः – मनुष्यः, मानुषः, मर्त्यः, मनुजः, नरः।

नीडम् – कुलायः, पक्षिवासः, नीडः।

गजः – दन्ती, दन्तावलः, द्विरदः, अनेकपः, द्विपः।

द्रुमः – वृक्षः, महीरुहः, शाखी, विटपी, पादपः।

भल्लूकः – भल्लुकः, ऋक्षाच्छः, भल्लः, भालूकः, अच्छः।

पाठः 3

# इति वार्ता:

| | | |
|---|---|---|
| आशयः | - | प्रकृतिः |
| उपाशयः | - | प्रकृतिदुरन्ताः |
| व्यवहाररूपम् | - | वार्ता |
| उद्देश्यानि/ | | |
| लक्ष्याणि | - | संस्कृतवार्तामाध्यमान् परिचिनोति। |
| | - | वार्तावाचने वार्तारचनायां च तात्पर्यं जनयति। |
| | - | परिस्थितिसंरक्षणार्थं करणीयानि कार्याणि प्रत्यभिजानाति। |
| पठनलक्ष्याणि | | |
| आशयपराणि | - | परिस्थितिसंरक्षणम् अधिकृत्य मुद्रागीतं रचयति। |
| | - | वार्तामाध्यमान् प्रत्यभिजानाति, पट्टिकां लिखति। |
| भााषापराणि | - | नूतनपदानि चित्वा समानपदानि लिखति। |
| | - | कर्तरि - कर्मणि प्रयोगान् विचिन्त्य लिखति। |
| | - | घटनाः पत्रिकावार्तारूपेण सज्जीकरोति। |
| | - | संख्याः संस्कृतभाषया लिखति। |
| मूल्यम्/मनोभावः | - | प्रकृतिः संरक्षणीया इति । |
| | - | संस्कृतभाषायां विविधाः वार्तामाध्यमाः सन्ति। |
| पठनक्षमता | - | लेखनसामर्थ्यं वर्धते। |
| | - | वार्तारचनाकौशलं सम्पादयति। |
| | - | प्रकृतिसंरक्षणविषये जागरूकता वर्धते। |
| कालांशः | - | 13 |

**आमुखम्**

आगोलतापनकारणात् कालावस्थापरिणामः सम्भवति इति सर्वे जानन्त्येव। इदानीं पारिस्थितिकदुरन्ताः न केवलं केरलेषु किन्तु आविश्वम् अतितीव्ररूपेण सम्भवन्ति। अतिवृष्टिः, अनावृष्टिः, जलोपप्लवः, मृत्पातः, हिमानीनां शोषणं चेति आगोलतापनस्य दुष्फलानि जीवजालानाम् अतिजीवनं दुष्करं कुर्वन्ति । वयनाटु चूरल्मला, मुण्डक्कै प्रदेशेषु प्रवृत्तः अतितीव्रमृत्पातः पाठभागे वार्तारूपेण स्वीकृतः।

वयं कथम् ईदृशवार्ताः जानीमः? वार्तामाध्यमद्वारा खलु! आधुनिकलोके वार्तामाध्यमानां प्रसक्तिः नितरां वर्धते किल। संस्कृतभाषायामपि विविधाः वार्तामाध्यमाः वर्तन्ते। ताः निरीक्ष्य संस्कृतवार्ताः कथं सज्जीकरोति इति अवलोकयामः।

**प्रवेशकप्रवर्तनम्**

अध्यापकः कक्ष्यां प्रविश्य अभिवादन-प्रत्यभिवादनानन्तरं ICT द्वारा आकाशवाणीवार्ताः श्रावयति। तदनन्तरं दूरदर्शनस्य साप्ताहिकवार्ताः 'वार्तावलिं' प्रदर्शयति। एवं संस्कृतभाषावार्तापत्रिकाः अपि प्रदर्शयति। तदर्थम् अनुबन्धे दत्तानाम् ओण्लैन् माध्यमानां साहाय्यः स्वीकरणीयः।

**पाठापग्रथनम्।**

भूमिः अस्माकं गृहम्। 450 कोटिवर्षपरिमितः आयुरस्ति पृथायाः। तस्यां विविधजीवजालानि सुखेन वसन्ति। अत्र होमोसापियन्स् नामकाः मनुजाः त्रिलक्षमितात् वर्षात् प्रभृति भूमौ परिणामं प्राप्य परिदृश्यन्ते। भूमेः तथा जीवजालानां च सुस्थितये प्रकृतिदुरन्ताः भीषणं वर्तन्ते। आगोलतापनमेव पारिस्थितिकदुर्घटनानां मुख्यहेतुः। अतः ऐक्यराष्ट्रसंस्थया आगोलतापनस्य न्यूनीकरणाय विविधाः परिश्रमाः कुर्वन्नस्ति।

आगोलतापनस्य मुख्यहेतवः के?

फोसिल् इन्धनानाम् उपयोगः, अन्तरीक्षे अमितकार्बण् उत्सर्जनं, पलास्तिकवस्तूनां ज्वालनं, हरितगृहप्रभावः (Green house effect), वननशीकरणमित्यादीनि अनेकानि कारणानि सन्ति।

आगोलतापनस्य दोषाः के ?

आगोलतापनस्य वर्धनेन अतिवृष्टिः, अनावृष्टिः, अतितीव्रचण्डवाताः, हिमानीनां शोषणं तथा समुद्रजलस्य संवर्धनं, मृत्पातः, भूस्खलनादीनि सम्भवन्ति। अतः आगोलतापनस्य न्यूनीकरणार्थं कार्याणि अस्माभिः आयोजितव्यानि । न केवलं अस्माकं सुखजीवनाय किन्तु आगामिन्यै परम्परायै च इयं भूमिः संरक्षणीया। तदर्थं कार्याणि कर्तुं छात्राः सज्जाः भवेयुः ।

वार्ताः प्रतिनिमेषं लोकविशेषान् अस्मान् ज्ञापयन्ति । अधुनातनलोके वार्तायाः विविधस्रोतसः सन्ति। आकाशवाणी, दूरदर्शनादुपरि अन्तर्जाल-सामूहिकमाध्यमद्वारा अपि वार्ताः अतिशीघ्रं प्रसरन्ति।

अत्र संस्कृतभाषायाः कियत् स्थानमस्ति इति चिन्तयामः। संस्कृतभाषायां वार्ताप्रसारणे के के माध्यमाः सन्तीति चर्चा कार्या। इदानीं लभ्यमानानां माध्यमानां परिचायनमपि अत्र उद्दिश्यते। संस्कृपठनेन एतेषु माध्यमेषु उद्योगं प्राप्तुम् अवसरः अस्ति इत्यपि छात्राः बोधयितव्याः।

2024 जूलाई मासान्ते वयनाटु चूरल्मला, मुण्डक्कै प्रदेशेषु सञ्जातां दुर्घटनामधिकृत्य सर्वे जानन्ति। तां वार्तां संस्कृतवार्तारूपेण पाठभागे दत्तः। दूरदर्शने मुख्यवार्तारूपेण वार्तायाः शकलानि प्रत्यक्षीभवन्ति इति पाठभागस्य विशेषता। पाठावतरणवेलायां वार्ताशकलानि उत्तरत्वेन लब्धुं लघुप्रश्नाः अध्यापकैः पृष्टव्याः।

उदाः - भूस्खलनं कुत्र अभवत् ?
सैनिकैः किम् आरब्धम् ?
पारिस्थितिकदुरन्तानां कारणानि कानि ?
दुरन्तान् अपवारयितुं कानि कानि प्रवर्तनानि करणीयानि ? इत्याद्याः चर्चाविषयाः भवन्तु।

**चित्राणां विशदीकरणम्**

१. T.V. Screen – दुर्घटनायाः दृश्यम्, वार्तावाचकस्य चित्रम्, Scrolling News.

२. तत्समयवार्ता - Live news, पश्चात्तले दुरन्तस्थलस्य दृश्यम्, Scrolling News .

**पदार्थाः-**

| | |
|---|---|
| अन्तर्जालिका | - Website |
| आगोलतापनम् | - Global warming |
| पर्यावरणम् | - परिस्थितिः |
| परिदृष्टाः | - अन्विष्य प्राप्ताः |
| विशेषप्रशिक्षिताः | - विशेषेण परिशीलनं प्राप्ताः ( Well Trained) |
| पर्यावरणसमस्याः | - परिस्थितिसमस्याः (Environmental issues) |
| मण्डलस्थाः | - प्रादेशिकाः (Regional) |
| अभिज्ञाः | - विशेषज्ञाः (Experts) |
| जैववैविध्यसंरक्षणप्रवर्तनम् | - जैवसुरक्षआपद्धतिः(Activities to ensure biodiversity) |
| सौरोर्जपरियोजनाः | - सौरोर्जपद्धतयः (Solar energy projects) |

## पठनप्रवर्तनानि।

**प्रवर्तनम् 1 संस्कृतेन संख्यालेखनम्।**

पठनलक्ष्यम् – संस्कृतेन संख्यालेखनसामर्थ्यं प्राप्नोति।

प्रवर्तनमिदं वैयक्तिकं भवति। प्रारम्भप्रवर्तनरूपेण शतपर्यन्ताः संख्याः छात्रैः स्मर्तव्याः। तदर्थं संघचर्चा आवश्यकी। तदनन्तरं द्वि-त्रीन् छात्रानाहूय शतपर्यन्तसंख्यानाम् आवर्तनं कर्तुं निर्दिशति। अनन्तरं अध्यापकेन संख्याः अवतार्यन्ते।

101 – एकाधिकशतम्

102 – द्वावधिकतम्

..................................

.................................. इति।

तदनन्तरं पाठपुस्तके निर्धारणाय प्रदत्तां मातृकां परिचाययति।

267 – सप्तषष्ठ्यधिकशतम्।

तदनन्तरम् अन्ये संख्याः एतदनुसारं लेखितुं निर्दिशति। शतकस्य स्थानेन साकं अधिकमिति पदं (उत्तरमिति पदं वा) योजनीयम्। छात्रैः लिखितानि पदानि आवश्यं चेत् शुद्धीकरोति। सम्पूर्णतया लिखितं चेत् अभिनन्दनं कार्यम्।

एवम् -

354 - चतुःपञ्चाशदधिकत्रिशतम्।

821 - एकविंशत्यधिकाष्टशतम्।

788 - अष्टाशीत्यधिकसप्तशतम्।

987 - सप्ताशीत्यधिकनवशतम्।

**मूल्यनिर्णयसूचकानि**

संख्यावबोधः। लेखनसामर्थ्यम्। संख्यास्थानावबोधः।

**प्रवर्तनम् 2 घटनानां वार्तारूपेण लेखनम्।**

पठनलक्ष्यम् – घटनानां वार्तालेखनसामर्थ्यं सम्पादयति।

घटनाः संस्कृतवार्तारूपेण सज्जीकृत्य अवतारयति। प्रवर्तनमिदं संघरूपेण प्रचालनीयम्। तदर्थम् अनुबन्धे प्रदत्तान् अन्तर्जालपुटान् निरीक्ष्य संस्कृवार्ताः पठित्वा संवीक्ष्य च वार्तायाः स्वरूपं अवगन्तुम् अवसरः अध्यापकेन दातव्यः।

www.navavani.org.in

www.samprathivartah.com

www.sudharmasanskritdaily.in

अनन्तरम् आनुकालिकाम् एकां घटनां (दुर्घटनाः, विद्यालयीयोत्सवाः, अन्ये वा भवन्तु) संघरूपेण स्थित्वा वार्तारूपेण लिखित्वा अवतारयतु इति निर्दिशति । संघाङ्गः अवतारयति । स्खालित्यानि निवारणीयानि । अन्ते वार्ताः समाहृत्य वार्तापत्रिकायाः निर्माणम्, आकाशवाणीवार्तारूपेण शब्दलेखनम्, दूरदर्शनवार्तारूपेण चित्रीकरणम् चेति विविधानुबन्धप्रवर्तनानि आयोजनीयानि।

**मूल्यनिर्णयसूचकानि**

वार्तारचनासामर्थ्यम् । लेखनसामर्थ्यम् । उचिता शैली ।

**प्रवर्तनम् 3 मुद्रावाक्यरचनम्**

पठनलक्ष्यम् – मुद्रावाक्यानि रचयितुं सामर्थ्यम् आर्जयति ।

पारिस्थितिकसमस्याः तासां निवारणं चाधिकृत्य मुद्रावाक्यरचनां कुर्वन्ति । पारिस्थितिकदुरन्तानां हेतवः के इति पाठभागे विविधाः सूचनाः सन्ति । पाठभागं सम्यक् पठित्वा तान्यधिकृत्य विशदचर्चा प्रचालनीया ।

- जलाशयेषु मालिन्यनिक्षेपं मा कुरुत।
- पलास्तिकवस्तूनां ज्वालनं मा कुरुत।
- विभवानां मितोपभोगः कार्यः।
- आगोलतापनस्य न्यूनीकरणप्रवर्तनानि करणीयानि।
- जैववैविध्यसंरक्षणप्रवर्तनानि करणीयानि।
- सौरोर्जपरियोजनाः प्रोत्साहनीयाः।
- कार्बण् रहित-इन्धनानाम् उपयोगः प्रोत्साहनीयः।
- विषवायुबहिर्गमने नियन्त्रणम् आवश्यकम्।
- पर्वतोपरि खननप्रवर्तनानां नियन्त्रणम् आवश्यकम्।
- वनभूमेः केदाराणां च परिवर्तनं मा कुरुत।

एतान् आशयान् उपयुज्य मुद्रावाक्यानि निर्मातुं निर्दिशति अध्यापकः।

उदाः-

"मा कुरुत ! मा कुरुत !
पलास्तिकानां ज्वालनम्"

"मा क्षिपतु ! मा क्षिपतु !
जलाशयेषु मालिन्यम्"

**प्रवर्तनम् ४ संस्कृतवार्तामाध्यमानां पट्टिकाकरणम् ।**

पठनलक्ष्यम् – संस्कृतवार्तामाध्यमान् अभिजानाति, पट्टिकां लिखति च ।

'इति वार्ताः' इति पाठभागः संस्कृतवार्ताविषयकः भवति खलु । अधुना कापि भाषा भवतु, वार्तासमाहरणाय अन्तर्जालसङ्केताः अधिकाः दृश्यन्ते । अनुबन्धे प्रदत्तान् सङ्केतान् उपयुज्य कथं संस्कृतवार्ताः पठितुं, श्रोतुं, द्रष्टुं च शक्यन्ते इति परिचायनम् अध्यापकेन करणीयम् ।

| | | |
|---|---|---|
| दूरदर्शनवार्ताः | - | www. dnews.gov.in |
| आकाशवाणीवार्ताः | - | www. newsonair.gov.in |
| अन्ये वार्तामाध्यमाः | - | www.navavani.org.in |
| | - | www.samprathivarthah.com |
| | - | www.sudharmasanskritdaily.in |

**प्रवर्तनम् ५ कर्तरि-कर्मणिप्रयोगानां विवेचनम् ।**

पठनलक्ष्यम् - कर्तरि-कर्मणिप्रयोगवैविध्यं अभिजानाति ।

**कर्तरिप्रयोगः** – प्रयोगाः त्रिविधाः । कर्तरि-कर्मणि-भावे चेति । तेषु कर्तरिकर्मणिप्रयोगयोः महद् प्राधान्यमस्ति । कर्तरि प्रयोगे कर्तुः प्राधान्यम् । कर्ता प्रथमायाम् । कर्म द्वितीयाविभक्तौ । क्रिया परस्मैपदी अत्मनेपदी वा । कर्तुरनुसारं क्रिया । यथा –

बालः पाठं पठति।

**कर्मणिप्रयोगः** – कर्मणिप्रयोगे कर्मणः प्राधान्यम् । कर्मानुसारं क्रियाप्रयोगः। कर्म प्रथमाविभक्तौ । कर्ता तृतीयायाम् । क्रिया आत्मनेपदी कर्मानुसारं भवेति । यथा –

बालेन पाठः पठ्यते।

अत्र कर्तरि प्रयोगस्थस्य बालः इति पदस्य तृतीया भवति - बालेन । कर्तरि प्रयोगस्थस्य पाठं इति पदस्य प्रथमया परिवर्तनं जातम् । कर्तरि प्रयोगे पठति इति परस्मैपदिनः पदस्य कर्मणि यक् प्रत्यये पठ्यते इति आत्मनेपदित्वं जायते ।

**कर्मणि प्रयोगात् कथं कर्तरिप्रयोगः?**

कर्मणि प्रयोगस्थस्य कर्तृपदं (तृतीया) प्रथमाविभक्तित्वेन आयाति । कर्मस्थं प्रथमान्तं पदं द्वितीयाविभक्तिरूपेण परिवर्तयति । अत्मनेपदिनः क्रियापदस्य परस्मैपदित्वं आत्मनेपदित्वं वा आयाति। यथा - वाल्मीकिना ग्रन्थः रचितः। अस्य कर्तरि रूपं तु वाल्मीकिः ग्रन्थं रचितवान् इति । रचितः इति क्तप्रत्ययान्तं रूपं भूतकालार्थे । तस्य क्तप्रत्ययस्य कर्तरि प्रयोगे क्तवत् प्रत्ययः प्रयुज्यते।

भावे प्रयोगे कर्म नास्ति । कर्ता तृतीयविभक्तौ स्यात् । क्रियापदं तु प्रथमपुरुषैकवचने च । यथा कुक्कुटैः कूज्यते । एवं कक्ष्यायां परिचायनं कृत्वा तदनन्तरं पाठपुस्तके प्रदत्तानि वाक्यानि विविच्य

लेखनाय निर्दिशति । छात्राः वैयक्तिकरूपेण लिखित्वा मूल्यनिर्णयाय समर्पयन्ति । तत्र स्खालित्यानि सन्ति चेत् अध्यापकेन निवारणीयानि ।

| कर्तरि प्रयोगः। | कर्मणि प्रयोगः |
|---|---|
| उदाः- अनुजः पाठं लिखति। | अनुजेन पाठः लिख्यते। |
| अलीना कवितां पठति। | अलीनया कविता पठ्यते। |
| बालः विद्यालयं गच्छति। | बालेन विद्यालयः गम्यते। |
| शिष्यः गुरुं नमति। | शिष्येण गुरुः नम्यते। |
| कर्षकः कृषिं करोति। | कर्षकेण कृषिः क्रियते। |

**अग्रिमपाठसंयोजकप्रवर्तनम्।**

'सा कला त्वाह्लाददात्री परा च सार्वलौकिकी'।

सार्वलौकिकी आह्लादप्रदायिनी च भवति कला इत्याशयः।

**अनुबन्धः**

**वार्तालेखनस्य मातृका -**

**राज्यस्तरीयः स्कूल् कलोत्सवः - कलाकिरीटं तृश्शूर् मण्डलेन स्वायत्तीकृतम् ।**

तिरुवनन्तपुरम् – पञ्चदिवसपर्यन्तम् अनन्तपुरीनगरं कलाप्रकटनैः सन्दीप्य कौमारकलायाः यवनिका पतिता। अन्तिमनिमेषं यावत् आकाङ्क्षां पूरयित्वा तृशूर् मण्डलेन कलाकिरीटम् स्वायत्तीकृतम्। 23 संवत्सरानन्तरमेव तृशूर् पुनः विजयकिरीटमवाप । पूर्वं 1994, 1999 वत्सरयोः मण्डलेनानेन प्रथमस्थानमवाप्तमासीत् । पालक्काट् मण्डलेन सह अनुनिमिषं प्रतियोध्य एकमङ्कम् अधिकमवाप्य तृशूर् मण्डलं विजयकिरीटम् अधारयत्। संस्कृतोत्सवे 15 अङ्कान् अवाप्य मलप्पुरम्, पालक्काट्, कासरगोट् मण्डलानि प्रथमस्थानं प्राप्नुवन्।

**सञ्चरतः रेलयानस्योपरि वृक्षः पतितः, यात्रिका- सुरक्षिताः।**

तृश्शूर् - चेरुतुरुत्तिसमीपे सञ्चरतः तिरुनेल्वेलि-जाम्नगर् एक्सप्रस् रेलयानस्योपरि प्रचण्डवातस्य कारणेन वृक्षः पतितः । ह्यः प्रभाते दशवादने अपघातः प्रवृत्तः। अनेन एकखण्डापर्यन्तं रेलयानानि स्थगितानि। यात्रिकाः सर्वे सुरक्षिताः इति अधिकृतैः विज्ञापितम्।

**परिस्थितिदनाचरणम् सुसम्पन्नम् ।**

तिरुवनन्तपुरम् - राज्ये सर्वत्र जूण् 5 तमे दिनाङ्के परिस्थितिदिनाचरणम् विविधैः कार्यक्रमैः समायोजितम्। विद्यालयेषु वृक्षकानां वितरणम्, वृक्षकानां वपनमित्यादयः कार्यक्रमाः संवृत्ताः। परिस्थितिसंरक्षणमधिकृत्य मुद्रावाक्यानि उन्नीय छात्राणां प्रकटनमपि सर्वत्र अचलत्। विद्यालयेषु परिस्थितिक्लब् इत्यस्य नेतृत्वेनैव कार्याणि समयोजितानि।

# आनन्दकम्

पाठः 4

# गद्दिका

| | | |
|---|---|---|
| आशयः | - | कला |
| उपाशयः | - | गोत्रकला |
| व्यवहाररूपम् | - | यात्राविवरणम् |
| उद्देश्यानि/ लक्ष्याणि | - | यात्रायां ज्ञानं लभते । |
| | | गद्दिका काचन गोत्रकला इति अभिजानाति । |
| | | सामूहिकैक्यप्राप्तये कलाः उपकुर्वन्ति । |
| मूल्यम्/ मनोभावः | - | गोत्रकलाः संरक्षणीया इति । |
| | | यात्राः प्रति आभिमुख्यम् । |
| पठनलक्ष्याणि आशयपराणि | - | गद्दिका - कलारूपमधिकृत्य लघुटिप्पणीं लिखति । |
| | | यात्रादैनिकीं रचयति । |
| | | प्रादेशिककलारूपाणां नामावलिं लिखति । |
| भाषापराणि | - | क्रियापदानां लट् उत्तमपुरुषपदविवेचनं करोति । |
| | | इति - अव्ययप्रयोगं जानाति । |
| पठनक्षमता | - | दैनिकीलेखनसामर्थ्यं जायते। |
| | - | गोत्रकलापरिचयः जायते। |
| कालांशः | - | 13 |

**पाठस्य आमुखम् ।**

केरलराज्यस्य गोत्रसंस्कारः अतिप्राचीनः भवति । केरलदेशः विभिन्नैः गोत्रकलारूपैः सम्पन्नं भवति । गोत्रसमूहे विभिन्नानि कलारूपाणि विद्यन्ते । तानि तेषां जीविते आचारे च निबद्धानि एव । स्वजीवितानुभवसंबन्धाः संस्काराः तेषां कलारूपे द्रष्टुं शक्यन्ते । नृत्तं, संगीतं, शिल्पम् इत्यादीनि कलारूपाणि ललितानि, आकर्षकाणि च ।

केरलीयगोत्रकलासु प्रायशः नृत्तरूपैः सह गानानां संगीतानां वाद्योपकरणानां च मेलनमपि अस्ति । प्रत्येकं गोत्रसमूहः तेषां सविशेषनृत्तरूपाणि पारम्पर्यरीत्या अवतारयति । गोत्रकलासु मङ्गलंकलि, पणियनृत्तम्, मरुत्त् कलि, मलप्पुलयाट्टम्, इरुलनृत्तम्, पलियनृत्तं, गद्दिका, तेय्यम्, पटयणिः, मिदुवनृत्तम्, काम्रनृत्तम्, इत्यादीनि केलीरूपाणि प्रसिद्धानि । गोत्रकलाविभागेषु प्रसिद्धं अन्यतमं च भवति गद्दिका । कलाः जीवितेन सह बद्धाः, अह्लाददायकाः, संस्कारदायकाः, संस्कृतिबोधकाश्च भवन्ति ।

**प्रवेशकप्रवर्तनम्**

पूर्वस्मिन् एकके प्रकृतिसम्बन्धिनः पाठाः पठिताः। अस्मिन् एकके कलाविषयप्रतिपादकाः पाठाः सन्निवेशिताः । केरलदेशे विद्यमाना गद्दिका इति गोत्रकलामधिकृत्य पठामः । कलाः कति विधाः? ताः काः? केषाञ्चन कलारूपाणां नामानि वदतु इत्यादिरीत्या चर्चां चालयति । छात्राणाम् अभिप्रायं क्रोडीकरोति ।

अस्मिन् शास्त्रयुगे वयं जीवामः । व्लोग्निर्माणे युष्मासु के के समर्थाः ? कः जानाति सम्यक् व्लोग् निर्मातुम्? कानि कानि कलारूपाणि युष्माभिः परिचितानि ?

छात्राणाम् उत्तरानुसारम् आवश्यकं चेत् युक्तं परिवर्तनं कृत्वा पाठभागं प्रविशामः ।

**पाठापग्रथनम्**

वयनाट् देशे अधिवसन् एकः गोत्रविभागः अटियसमुदायः। तेषाम् अनुष्ठानकलारूपमेव गाद्दिका । कलारूपमिदं नाट्टुगद्दिका, पूजागद्दिका इति द्विधा विभक्तम् । नाट्टुगद्दिका समाजहिताय अवतारयति । पूजागद्दिका आचारपरं च । अस्य कलारूपस्य अनुष्ठानेन रोगनिवारणं साध्यम् इति तेषां विश्वासः । मलयाल(कैरली) कन्नटाभाषयोः मिश्रणमेव अस्य कलारूपस्य भाषा । तुटिः नाम वाद्योपकरणस्य साहाय्येन द्रुततालानुसारं नर्तकाः नृत्यन्ति।

**नूतनपदानि तेषामर्थाः च**

| | | |
|---|---|---|
| ग्रीष्मर्तोः | - | ग्रीष्मकालस्य |
| उष्णतरङ्गव्यापनरूपा | - | उष्णातपं सर्वत्र प्रसरिता । (अत्युष्णेन अन्तरिक्षम् आतपयुक्ता) |
| समस्याः | - | प्रश्नाः। |
| केदारः | - | क्षेत्रम् । |
| केदारसंगीतेन | - | कर्षकाणां संगीतालपनेन । |
| परिलसति | - | शोभते। |
| खगकूजनैः | - | पक्षिणां कूजनैः |
| नितराम् | - | अत्यधिकम् । |

| | | |
|---|---|---|
| अनर्थनिवारणम् | - | अनभिलाषितकार्याणां विनाशम्। |
| भागभाजः | - | भागं भजन्ते इति भागभाजः । भागं गृहीताः इत्यर्थः। |
| सन्निवेशितानि | - | अन्तर्भवितानि । |
| मिश्ररूपया | - | सम्मिश्ररूपया (संयोगरूपया) |
| सुषिरं | - | छिद्रयुक्तं (विवरम्, रन्ध्रम्) |
| देशक्षेमः | - | देशस्य क्षेमः(ऐश्वर्यम्) |

**व्याकरणकार्याणि।**

केदारसंगीतेन सह, मया साकं , ताभिः साकम् - सहार्थकस्य अव्ययस्य योगे 'सहयुक्तेऽप्रधाने' इति सूत्रेण तृतीया । संगीतेन, मया, ताभिः – तृतीयारूपाणि । समानार्थकशब्दानाम् – सह, साकं, समम्, सार्धं, समेतम्, सहितम् इत्यादिशाब्दानां योगे च तृतीया स्यात् ।

## पठनप्रवर्तनानि।

**प्रवर्तनम् 1 यात्रामधिकृत्य दैनिकीरचना ।**

पठनलक्ष्यम् – अनुभवलेखनसामर्थ्यं सम्पादयति।

दिनाङ्कः - 10-08-2025

बुधवासरः

अद्य वयं त्रिंशत् छात्राः पञ्च अध्यापकैः त्रिभिः अध्यापिकाभिः सह एकदिनपठनयात्रायै अनन्तपुरीतः पोन्मुटि विनोदसञ्चारकेन्द्रं प्रति अगच्छामः। सर्वे अत्यन्तम् उल्लासवन्तः आसन्। प्रभाते सार्धाष्टवादने यात्रा आरब्धा। याने सर्वे छात्राः अध्यापकाश्च गानमनुसृत्य नृत्तम् अकुर्वन्। किञ्चित्समयानन्तरं मार्गमध्ये प्रभातभक्षणं कृत्वा पादोनदशवादने पोन्मुटिं प्राप्तवन्तः।

नगरप्रान्ते एव शान्तः प्रकृतिसुन्दरः च पोन्मुटिप्रदेशः वर्तते । अस्य सौन्दर्यं अस्माकं मनसि अतीव सन्तोषम् अजनयत्। उन्नताः प्रदेशाः, शीतपवनः, हरिताभा, गिरिप्रदेशात् उद्भूतः कल्लार्नदी, तस्याः समतलः च अस्मभ्यं स्वागतं व्याजह्रुः।

मध्याह्नभोजनानन्तरं कल्लार् गतवन्तः। कल्लार् तीरस्य समीपस्थः मीन्मुट्टी -जलपातः अतिरमणीयः अस्ति। अत्र नैकानि वासगृहाणि सन्ति । साहसिकयात्रा मम मनसि अविस्मरणीयतां जनयामास । सा यात्रा विद्यार्थिनां अध्यापकानां च मध्ये विद्यमानं परस्परस्नेहम् अवर्धयत् । सायाह्ने अन्तरिक्षे निर्भराः हिमकणाः पोन्मुटिं सुन्दरतरं चक्रुः।

सन्दर्शनानन्तरं रात्रौ अष्टवादने विद्यालयं प्रत्यागताः। रक्षाकर्तारः अस्मान् गृहं नेतुं आगताः आसन्। तदेव मम विद्यालयजीवितस्य इष्टतमं दिनम् आसीत्।

**मूल्यनिर्णयसूचकानि**

उचिता शैली । भाषाशुद्धिः । आशयस्पष्टता ।

**प्रवर्तनम् 2 पट्टिकापूरणम्।**

पठनलक्ष्यम् – उत्तमपुरुषैकवचनद्विवचनबहुवचनरूपाणि प्रयोक्तुं जानाति।

| | | |
|---|---|---|
| **अहं** लिखामि | **आवां** लिखावः | **वयं** लिखामः |
| **अहं** पठामि | **आवां** पठावः | **वयं** पठामः |
| **अहं** भवामि | **आवां** भवावः | **वयं** भवामः |

**मूल्यनिर्णयसूचकानि**

अस्मद्शब्दस्य रूपज्ञानम्। वाक्यघटना । कर्तृक्रियासमन्वयः।

**मातृका –**

| | | |
|---|---|---|
| अहं क्रीडामि | आवां क्रीडावः | वयं क्रीडामः |
| अहं धावामि | आवां धावावः | वयं धावामः |
| अहं गच्छामि | आवां गच्छावः | वयं गच्छामः |

**प्रवर्तनम् 3 वाक्यपरिवर्तनम्**

पठनलक्ष्यम् – 'इति' अव्ययप्रयोगं जानाति।

अत्र सम्भाषणवाक्यं दत्तमस्ति । वाक्यं केवलकथनमित्यस्मात् वाक्यान्ते 'इति अवदत्' इति संयोज्य वाक्यं गद्यरूपेण परिवर्तयति । यदि प्रश्नवाचकमस्ति तर्हि वाक्यान्ते 'इति अपृच्छत्' इति संयोज्य वाक्यं परिवर्तयति।

1. अध्यापिका –'पाठं सम्यक् पठतु'।
   पाठं सम्यक् पठतु इति अध्यापिका अवदत्।
2. पिता - 'पुत्रि! शीघ्रम् आगच्छतु'।
   पुत्रि शीघ्रम् आगच्छतु इति पिता अवदत्।

प्रश्नवाचकस्य परिवर्तनं कथमिति पश्यामः।

1. मार्टिन् –'किमर्थं भवान् रोदिति?'
   किमर्थं भवान् रोदिति इति मार्टिन् अपृच्छत्।
2. हक्किम् –'कदा भवान् नगरं गच्छति?'
   कदा भवान् नगरं गच्छति इति हक्किम् अपृच्छत्।

**मूल्यनिर्णयसूचकानि**

आशयावगमनम् । वाक्यघटना । वाक्यपरिवर्तनसामर्थ्यम्।

**प्रवर्तनम् 4 तद्देशीयकलारूपाणां नामावलिनिर्माणम् ।**

पठनलक्ष्यम् – प्रादेशिककलारूपाणां नामानि जानाति ।

**पटयणिः** – പത്തനംതിട്ട, കോട്ടയം ജില്ലകളിലും കൊല്ലം, ആലപ്പുഴ ജില്ലകളിലെ സമീപപ്രദേശങ്ങളിലും അവതരിപ്പിക്കപ്പെടുന്നു. ഒരു പരമ്പരാഗത നാടോടിനൃത്തവും അനുഷ്ഠാനകലയുമാണിത്

**मङ्गलंकलि** - മാവിലൻ, മലവേട്ടുവൻ സമുദായങ്ങളുടെ ഇടയിൽ പ്രചാരത്തിലുള്ള ഒരു സംഗീതനൃത്തരൂപം. വൈവിധ്യമാർന്ന ആശയമുൾക്കൊള്ളുന്ന പാട്ടുകൾ തുളുവിലും മലയാളത്തിലുമാണ്. കാസർകോട് ജില്ലയിൽ പ്രചാരം. (ഒള്ളുള്ളേരി.... ഒള്ളുള്ളേരി മാനിനങ്കേരേ.....

**मरुत्तुकलि** – വടക്കൻ കേരളത്തിൽ പൂരക്കളിയുമായി ബന്ധപ്പെട്ട കലാരൂപം. സാഹിത്യം, സംഗീതം, നൃത്തം എന്നിവ ചേർന്നത്. മലയാളം, സംസ്കൃതം എന്നീ ഭാഷകളിൽ സംവാദാത്മകമായാണ് അവതരിപ്പിക്കുന്നത്.

**कलंपाट्ट्** – മണ്ഡലകാലത്തെ അനുഷ്ഠാനങ്ങളിൽ പ്രധാനം. ഭദ്രകാളി, അയ്യപ്പൻ, വേട്ടയ്ക്കൊരു മകൻ, സർപ്പം എന്നിവയ്ക്കായി നടത്തുന്ന വിശേഷവഴിപാട്.

**काक्करिश्शिनाटकम्** – കേരളത്തിലെ നാടോടികളായ കാക്കാലന്മാർ പരമ്പരാഗതമായ രീതിയിൽ അവതരിപ്പിക്കുന്ന ആക്ഷേപഹാസ്യനാടകം.

**ओप्पना** – പരമ്പരാഗതമായി പല പ്രധാന സാംസ്കാരിക ചടങ്ങുകളിലും അവതരിപ്പിക്കുന്നു. വിശേഷിച്ചും കേരളത്തിലെ മുസ്ലിം സമുദായത്തിൽ നിലനിൽക്കുന്ന ജനകീയകലാരൂപം. മലപ്പുറം, കോഴിക്കോട്, കണ്ണൂർ തുടങ്ങി ഉത്തരകേരളത്തിലാണ് ഈ കലാരൂപം പ്രധാനമായും അവതരിപ്പിക്കുന്നത്.

**कुरत्तियाट्टम्** - കേരളത്തിലെ ഒരു ഗ്രാമീണകലാരൂപം. വടക്കൻ, തെക്കൻ എന്നീ ഭേദങ്ങളുണ്ട്. വടക്കനിൽ ഗദ്യത്തെക്കാൾ പദ്യത്തിനാണ് പ്രാധാന്യം.

**तेय्यम्** – ഉത്തരകേരളത്തിലും കർണാടകത്തിലും പ്രചാരത്തിലുള്ള ആരാധനാ സമ്പ്രദായങ്ങളിൽ ഒന്നാണ് അനുഷ്ഠാനകലാരൂപമായ തെയ്യം.

**तिरा** – കോഴിക്കോട്, മലപ്പുറം ജില്ലകളിലെ കാവുകളിലും മറ്റും വർഷംതോറും നടത്തിവരുന്ന അനുഷ്ഠാനകലാരൂപം.

**पावकलि** – പാവകളെ ഉപയോഗിച്ച് കഥപറയുന്ന കലാസമ്പ്രദായം. ഒന്നോ അതിലധികമോ കലാകാരന്മാർ പാവകളെ കൈകൊണ്ട് ചലിപ്പിച്ച് കഥ അവതരിപ്പിക്കുന്നു. പാവക്കൂത്തെന്നും അറിയപ്പെടുന്നു.

**कलरिप्पयट्ट्** – കേരളത്തിലെ ഒരു തനത് ആയോധനകല. നിയമങ്ങളാൽ ചിട്ടപ്പെടുത്തിയത് എന്ന സവിശേഷതയുള്ള ആയോധമുറ.

**कैकोट्टिक्कलि** – കേരളത്തിലെ ജനപ്രിയമായ ഒരു നൃത്തരൂപമാണ് കൈകൊട്ടിക്കളി. ഓണക്കാലത്ത്, പ്രധാനമായും സ്ത്രീകളാണ് ഇതവതരിപ്പിക്കുന്നത്. ധനുമാസത്തിലെ തിരുവാതിര നാളിൽ അവതരിപ്പിക്കുന്നതിനാൽ തിരുവാതിരക്കളി എന്നും അറിയപ്പെടുന്നു.

**मुटियाट्टम्** – പുലയവിഭാഗമാണ് പ്രധാനമായും ഈ കലാരൂപം അവതരിപ്പിച്ചിരുന്നത്. സാംബവർ, വേട്ടുവർ, ഉള്ളാടർ തുടങ്ങിയവരുടെ ഇടയിലും ഈ കലാരൂപം പ്രചരിച്ചിരുന്നു. തെക്കേ മലബാർ, കൊച്ചി, ചേർത്തല എന്നിവിടങ്ങളിൽ തലയാട്ടം എന്നും മാവേലിക്കര, പന്തളം, പത്തനംതിട്ട, ചെങ്ങന്നൂർ, വൈക്കം, കോട്ടയം, ഇടുക്കി, ചങ്ങനാശ്ശേരി, ആലപ്പുഴ, കൊല്ലം എന്നിവിടങ്ങളിൽ മുടിയാട്ടം എന്നും അറിയപ്പെടുന്നു.

**वट्टक्कलि** - വേട്ടുവസമൂഹത്തിൽ കാണപ്പെടുന്ന ഒരു നൃത്തരൂപം. ആണും പെണ്ണും ചേർന്നവതരിപ്പിക്കുന്നു. വൃത്താകൃതിയിൽ വേഗത്തിലുള്ള ചലനമാണ് വിശേഷത. പാട്ടിനൊപ്പം ചുവടുവച്ച് പല വൃത്തങ്ങൾ ഉണ്ടാക്കുന്നു. ചുവടുകളി, ചവിട്ടുകളി എന്നിങ്ങനെയും അറിയപ്പെടുന്നു.

**दफ्मुट्ट्** – ഇസ്ലാംമതവിശ്വാസികളുടെ ഇടയിൽ പ്രചാരമുള്ള കലാരൂപം. മലബാർ മേഖലയിൽ പ്രചുരപ്രചാരം

**मार्गंकलि** – ക്നാനായ സുറിയാനി ക്രൈസ്തവരുടെ അനുഷ്ഠാനപരമായ നൃത്തരൂപം.

**अरवनमुट्ट्** – ഉത്തരകേരളത്തിലെ മുസ്ലിങ്ങൾക്കിടയിൽ പ്രചാരത്തിലുള്ള ഒരു പുരാതന അനുഷ്ഠാന കലാരൂപം. മലപ്പുറം, കോഴിക്കോട്, കണ്ണൂർ, കാസർകോട് ജില്ലകളിൽ പ്രചാരമുള്ള കലാരൂപം.

**मूल्यनिर्णयसूचकानि**

तद्देशीयकलारूपाणां ज्ञानम् । निरीक्षणपाटवम् । पट्टिकाकरणम्।

**प्रवर्तनम् 5 गद्दिकामधिकृत्य लघुटिप्पणीलेखनम्।**

पठनलक्ष्यम् - गद्दिकायाः सामान्यज्ञानम् सम्पादयति।

**गद्दिका ।**

अस्माकं केरलदेशः विभिन्नैः कलारूपैः सम्पन्नं भवति । तेय्यं पटयणिः तुल्लल् कथकलि इत्यादीनि प्रसिद्धानि कलारूपाणि भवन्ति । तेषु वयनाट् देशे अटियसमुदाये प्रचाल्यमानं गोत्रकलारूपं भवति गद्दिका । अस्य कलारूपस्य अनुष्ठानेन रोगशमनम् अनर्थनिवारणं च साध्यामिति तेषां विश्वासः। ललितैः वर्णमनोहरैः वेषैः अलङ्कृताः स्त्रियः स्त्रीवेषधारिणः पुरुषाः च मिलित्वा नृत्यन्ति। पुरुषाः वाद्योपकरणानि उपयुज्य गोत्रभाषया रचितानि गीतकानि आलपन्ति । तुटिः चीनि इत्यादीनि सुषिरवाद्योपकरणानि अस्मिन् कलारूपे उपयुज्यन्ते । केरलसर्वकारः प्रतिवर्षं गद्दिकोत्सवम् आयोजयति।

**मूल्यनिर्णयसूचकानि**

आशयव्यक्तता । उचितः भाषाप्रयोगः । भाषाघटना ।

**प्रवर्तनम् 6 वाक्यपरिवर्तनम्**

पठनलक्ष्यम् - सहार्थकशब्दानां योगे तृतीया विभक्तिरिति जानाति।

अत्र सहार्थकपदानि समं, सार्धं, साकं, सहितम् इत्यादि पदानि प्रयोगपूरणाय दत्तानि सन्ति। एतैः शब्दैः सह तृतीया विभक्तिः भवति।

1. पुत्रः मित्रेण सह क्रीडाङ्कणे क्रीडति।
2. नीलिमा राधिकया समं नृत्यति।
3. जिष्णुः जनकेन साकं चलच्चित्रं पश्यति।
4. अनुजः अग्रजया सार्धं भोजनं करोति।
5. क्रीडया सहितं पठनमपि आवश्यकम्।

**मूल्यनिर्णयसूचकानि**

सहार्थकपदानां प्रयोगज्ञानम् । तृतीयाविभक्तिज्ञानम् । वाक्यघटना।

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

न कोपि उपहनीयः खलु - इत्यस्ति संयोजकं वाक्यम् । अर्थात् कमपि जनं न परिहसेत्। केनेपि कारणेन पुरतो विद्यमानस्य परिहसनं न कार्यमिति अत्र सारम्।

## अनुबन्धः

### पि. के. कालन् (1937-2007)

गाद्दिका नाम गोत्रकलारूपस्य कुलपतिः आसीत् पि. के. कालन् महाभागः । स : वयनाट् जिल्लायां मानन्तवाटीसमीपस्थे तृश्शिलेरीग्रामे अजायत । तस्य पितरौ कोलुम्पः करुत्ता च आस्ताम्। गोत्रजनसमूहे प्रचलितानाम् अन्धविश्वासानाम् अनाचाराणां च दूरीकरणाय सः अहोरात्रं प्रयत्तवान् । सः पुरोगमनसामाजिकप्रवर्तक: अटियगोत्रसमुदायस्य समुद्धारकः च आसीत् । कालन् महाशयस्य प्रयत्नेन गद्दिका नाम गोत्रकलारूपं समान्यजनानां कृते परिचितमभवत् । सः गाद्दिका नाम कलारूपद्वारा गोत्रजनविभागस्य जीवितसमस्यां जनतासमक्षम् उद्घोषितवान् ।

तुटिनामकेन वाद्योपकरणेन कालन्महोदयस्य गद्दिकावतारणाम् अनिर्वचनीयमानन्दं सहृदयेभ्यः प्रादात् । माधुर्य-पारुष्यसमन्वितमयः तुटितालः अविस्मरणीयः। पश्चात् सः महाशायः केरल-फोक्लोर् समितेः अध्यक्षः समजायत। प्रख्यातोऽयं कलाकारः 2007 तमे वर्षे दिवङ्गतः अभवत्।

**क्रियापदानि**

परिलसति - परि+ लस क्रीडायाम् पर- लट्, प्र.पु. ए.व ।

परिलसति - परिलसतः - परिलसन्ति ।

करोमि - डुकृञ् करणे पर. लट् उ.पु.ए.व ।

करोमि - कुर्वः - कुर्मः

अवतार्यते - अव + तृ तरणे कर्मणि लट् प्र.पु.ए.व।

अवतार्यते - अवतार्येते - अवतर्यन्ते ।

आलपन्ति - आङ्+ लप व्यक्तायां वाचि पर. लट् प्र.पु.ए.व ।

आलपति - आलपतः - आलपन्ति।

उपयुज्यन्ते - उप + युज् संयमे आत्मनेपदि लट् प्र.पु.ब.व ।

उपयुज्यते - उपयुज्येते - उपज्यन्ते।

**पदच्छेदः**

| | |
|---|---|
| ततश्च | = ततः +च |
| समीरणैश्च | = समीरणैः + च |
| नैकाः | = न + एकाः |
| देशेऽस्मिन् | = देशे + अस्मिन् |
| स्तुतिपराण्येव | = स्तुतिपराणि + एव |
| कथमिति | = कथम् + इति । |

**कोशः**

| | |
|---|---|
| दिवसः | - घस्रो दिनाहनि वा तु क्लीबे दिवसवासरौ |
| गिरिः | - अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः। |
| खगः | - खगे विहङ्गविहगविहङ्गमविहायः। |
| निनदः | - निनादनिनदध्वनिध्वानस्वस्वनाः। |
| अंशुकम् | - वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम्। |

पाठः 5

# धीरो दूतः।

| | | |
|---|---|---|
| आशयः | - | कला |
| उपाशयः | - | नाटकम् |
| व्यवहाररूपम् | - | नाटकम् |
| उद्देश्यानि /लक्ष्याणि | - | संस्कृतनाटकेषु भासस्य नैकानि नाटकानि सन्तीति जानाति। |
| | - | दूतघटोत्कचमधिकृत्य परिचयं प्राप्नोति। |
| मूल्यम्/मनोभावः | - | संस्कृतसाहित्ये नैकानि नाटकानि सन्ति। तानि पठनीयानि। |
| | - | अभिनयः आशयविननमयाय उपकरोति।अतः नाटकोषु भागभागित्वं स्वीकरणीयम्। |
| पठनलक्ष्याणि | | |
| आशयपराणि | - | भासनाटकानां नामावलिं निर्मांति। |
| | - | नाटकं कथारूपेण परिवर्तयति। |
| | - | नाटकानां तत्कर्तॄणां च पट्टिकां निर्मांति। |
| भाषापराणि | - | सम्बोधनपदानि चित्वा लिखति। |
| | - | कथापात्रस्य स्वभावचित्रणं करोति। |
| | - | प्रश्नोत्तरक्रीडां करोति। |
| पठनक्षमता | - | सम्भाषणसामर्थ्यं वर्धते। |
| | - | व्यवहारपरिवर्तनं सम्पादयति। |
| | - | सम्बोधनविभक्तिज्ञानं वर्धते। |
| | - | रचनासामर्थ्यं प्राप्नोति। |
| | - | प्रश्ननिर्माणं जानाति |
| कालांशः | - | 15 |

**पाठस्य आमुखम्**

संस्कृतसाहित्ये अनेकानि नाटकानि सन्ति। नाटकानां विचिन्तने दशप्रकाराणां रूपकाणां परामर्शः अवश्यमेव करणीयः। किन्तु नाटकादीनां विचारविमर्शात् पूर्वमेव अथवा भरतमुनेः नाट्यशास्त्रकल्पनायाः प्रागेव नाटकमिति सङ्कल्पस्य कृते उचितः परिवेषः महाकविना भासेन प्रदत्तः वर्तते। अतः भासमहाकवेः नाटकानां परिचयं विना संस्कृतनाटकसागरं प्रवेष्टुं न शक्यते।

भासः संस्कृतनाटककारेषु प्रमुखः एव। तेन त्रयोदश नाटकानि विरचितानि सन्ति। तेषां नामानि अनुबन्धे प्रदत्तानि च। तेषु अन्यतमं भवति दूतघटोत्कचम्। कौरवपाण्डवयोर्मध्ये महायुद्धं प्रवर्तते यत् महाभारतयुद्धमिति कथ्यते। तदानीं पाण्डवपक्षस्य दौत्यं धरन् भीमपुत्रः घटोत्कचः कौरवभवनं प्रविशति। तत्र तस्य दूतप्रस्तुतिरेव नाटकस्यास्य प्रतिपाद्यविषयः। अस्मिन् नाटके एक एव अङ्कः विद्यते।

**प्रवेशकप्रवर्तनम्**

अष्टमकक्ष्यायां पठन् छात्रः अवश्यं संस्कृतोत्सवमधिकृत्य परिचितः भवितुमर्हति। संस्कृतोत्सवेषु बह्व्यः प्रतियोगिताः सन्ति इति तेषां ज्ञानं स्यात्। अतः तस्मिन् विषये लघु लघु प्रश्नान् परिपृच्छय प्रस्तुतं प्रति प्रविशामः। यथा – भवद्भिः कानि नाटकानि दृष्टानि सन्ति? भासस्य नाटकानि परिचितनि वा? भासः कः? कालिदासः कः? भवभूति कः? इत्यादि। यथोचितं छात्राणां कृते सहायतां प्रदाय पाठस्य आमुखं प्रति तान् नयामः।

**पाठापग्रथनम्**

भासनाटकानि त्रयोदश सन्ति। तेषु दूतघटोत्कचम् अतिविशिष्टम् एकाङ्कनाटकं भवति। भीमसेनस्य हिडिम्बायां जातः तनयः घटोत्कचः भवति नायकः। वीररसप्रधानमिदं नाटकम्। वनौकाः घटोत्कचः पाण्डवानां सन्देशवाहकः सन् कौरवभवनं गच्छति। तत्र घटोत्कचस्य धीरतां योग्यतां दूतप्रस्तुतिं च नाटकेऽस्मिन् वर्णयति। महाभारतयुद्धसमये पद्मव्यूहे वञ्चितः अर्जुनपुत्रः अभिमन्युः मारितः अभवत्। तदानीं पाण्डवानां दुःखं निर्वर्ण्य श्रीकृष्णः कौरवान् उद्बोधयितुं दूतमेकं तत्र प्रेषयति। सः दूतः न साधारणः, न राजपुरुषः, न नियमज्ञः, न शिक्षितपटुः सः वनप्रान्तवासी राक्षसकुलोत्पन्नः घटोत्कचः वीरः धीरः अर्पणधीः च भवति।

घटोत्कचस्य प्रवेशेन नाटकं इतोऽपि चटुलतां प्राप्नोति। सम्भाषणस्य शक्तिः अनुवाचकान् आवेशभरितान् करोति। दुर्योधनधृतराष्ट्रादीनां परिहासाच्छादितभाषणानि विरुद्ध्य उचितं प्रत्युत्तरं प्रददाति घटोत्कचः। भासनाटकेषु अत्युत्कृष्टा सम्भाषणरीतिः नाटकेऽस्मिन्नेव द्रष्टुं शक्यते। राजाधिकारिणः प्रति वनौकसः अतितीक्ष्णं प्रतिभाषणम् अत्र सूक्ष्मतया भासः निवेशयति। न केवलं तत्, अधिकारिणः दुर्वृत्तिं प्रकाशयितुं तथा च तिरस्कृतानां दूतत्वयोग्यतां प्रदाय उद्धर्तुं दूतघटोत्कचमिति नाटकं भङ्ग्यन्तरेण यतते। परिवर्तमानस्य समूहस्य परिच्छेद एव प्रत्येकं नाटकमिति च कक्ष्यायां स्मारयितुम् अध्यापकः न विस्मरेत्।

## पठनप्रवर्तनानि

**प्रवर्तनम् 1 सम्बोधनपदलेखनम्**

पठनलक्ष्यम् - सम्बोधनविभक्तेः ज्ञानं वर्धते।

पाठभागे कानिचन सम्बोधनपदानि सन्ति। तेषु अजन्तानि हलन्तानि च सन्ति। तानि पदानि चित्वा टिप्पणीपुस्तके लिखति।

सम्बोधनपदानि – पितामह!, पुत्र!, शकुने!, दीर्घहस्त!, पौत्र!, घटोत्कच!, वत्स!।

**मूल्यनिर्णयसूचकानि**

सम्बोधनपदावबोधः। विभक्तिपरिचयः । चयनसामर्थ्यम् ।

(नामपदानां सम्बोधना विभक्तिः वर्तते। सर्वनामपदानां सम्बोधना विभक्तिः नास्ति। सम्बोधनपदानां पुरतः सामान्येन है, हे, रे, अरे, अङ्ग, भोः, हल, अयि इत्यादिशब्दाः दृश्यन्ते। एते शब्दाः व्याक्षेपकशब्दाः भवन्ति। एतेभ्यः ऋते विद्यमानानि नामपदानि सम्बोधनपदानि भवन्ति। (यथा हे बालक! इत्यत्र हे इति व्याक्षेपकशब्दः, बालक इति सम्बोधनपदम्।) सम्बोधनपदैः सह व्याक्षेपकशब्दानां प्रयोगः अनिवार्यः नास्ति। श्रोतुः अथवा सम्बोध्यस्य श्रद्धां वक्तरि समानेतुं वक्त्रा क्रियमाणः विकारप्रकटनशब्दविशेषः एव व्याक्षेपकशब्दः।)

**प्रवर्तनम् 2 नाटकभागस्य कथारूपेण परिवर्तनम्।**

पठनलक्ष्यम् – व्यवहारपरिवर्तनज्ञानं प्राप्नोति।

दूतघटोत्कचमिति भासनाटकस्य एकः भाग एव धीरो दूत इति पाठभागः। घटोत्कचस्य दूतप्रस्तुतौ जायमानाः घटनाः एव अत्र प्रतिपादयति।

महाभारतयुद्धे अर्जुनस्य पुत्रः अभिमन्युः कौरवैः निर्मिते पद्मव्यूहे मारितः अभवत्। पुत्रविनाशात् पाण्डवाः सर्वे अतीव दुःखिताः अभवन्। तद्दृष्ट्वा श्रीकृष्णः भीमसेनस्य अपरं पुत्रं घटोत्कचं दूतत्वेन कौरवसमीपं प्रेषयति।

कौरवभवनं प्राप्तः घटोत्कचः पितामहं धृतराष्ट्रम् अभिवादयन् आगमनोद्देश्यं निवेदयति। अभिमन्योः विनाशात् अर्जुनस्य या दुरवस्था वर्तते सा अवस्था धृतराष्ट्रस्यापि भविष्यतीति श्रीकृष्णस्य सन्देशं श्रुत्वा दुर्योधनः तं परिहसति। तदानीं दुर्योधनाय दत्तं सन्देशं श्रावयति – क्षत्रियाणां विनाशकालः समीप एव वर्तते। अर्जुनस्य कृते गाण्डीवेन कौरवाणां हननं अतिलघुतरं कार्यमेव इति।

तच्छ्रुत्वा शकुनिः घटोत्कचं परिहासवचसा व्यवहरति। तदानीं अक्षैः फलके क्रियमाणा केलिः नास्ति समरकर्म, तत्र प्राणान् पणीकृत्य एव युद्धं कुर्वन्ति, न परदाराहरणं पणः इति घटोत्कचः तं प्रतिवदति।

दुश्शासनः तु हिडिम्बायाः स्वभावसदृशः दर्पः एव घटोत्कचे वर्तते इति आक्रोशति। तदारोपणम् आकर्ण्य घटोत्कचः कौरवाणाम् आसुरस्वभावः राक्षसेभ्यश्च क्रूरतरः इति सोदाहरणं प्रतिपादयति। यथा - निशाचराः जतुगृहे सुप्तान् भ्रातॄन् न दहन्ति। ते भ्रातुः पत्नीं न आक्षिपन्ति, ते स्वकीयान् पुत्रान् न घ्नन्ति। तत्सर्वं कौरवाः एव कुर्वन्ति इति।

कौरवाणां वृत्तविमर्शं श्रुत्वा दुर्योधनः घटोत्कचं - दूतस्तु दूतवृत्तिं करोतु इति परिहसति। तदानीं केवलो दूतः नास्मि, युद्धाय अपि सन्नद्धोऽहम्, सर्वे सिद्धाः भवन्तु इत्युक्त्वा घटोत्कचः स्वस्य पौरुषं प्रकटयति।

पश्चात् पितामहस्य धृतराष्ट्रस्य वचोभिः नियमितचित्तः घटोत्कचः दूतस्य प्रतिवाचं गृहीत्वा गच्छति।

**मूल्यनिर्णयसूचकानि**

आशयग्रहणसामर्थ्यम्। रचनासामर्थ्यम्। भाषाशुद्धिः। वाक्यघटना।

**प्रवर्तनम् 3 भासनाटकानां नामावलिनिर्माणम्।**

पठनलक्ष्यम् – भासनाटकानां परिचयः जायते।

पाठपुस्तकस्य अनुबन्धे भासनाटकानां सम्पादनमधिकृत्य लघुविवरणं दत्तमस्ति। तं भागं पठित्वा तत्र परामृष्टानां भासनाटकानां नामानि पट्टिकारूपेण छात्राः लिखन्ति।

**भासनाटकानि**

| | |
|---|---|
| रामायणकथाश्रितानि | अभिषेकनाटकम् |
| | प्रतिमानाटकम् |
| महाभारतकथाश्रितानि | कर्णभारम् |
| | ऊरुभङ्गम् |
| | मध्यमव्यायोगः |
| | पञ्चरात्रम् |
| | दूतघटोत्कचम् |
| | दूतवाक्यम् |
| भागवतकथाश्रितानि | बालचरितम् |
| उदयनकथाश्रितानि | प्रतिज्ञायौगन्धरायणम् |
| | स्वप्नवासवदत्तम् |
| लोककथाश्रितानि | अविमारकम् |
| | दरिद्रचारुदत्तम् |

**मूल्यनिर्णयसूचकानि**

निरीक्षणपाटवम् । आशयावबोधः । चयनसामर्थ्यम् ।

**प्रवर्तनम् 4 कथापात्रनिरूपणम्**

पठनलक्ष्यम् – कथापात्रमधिकृत्य लेखितुं सामर्थ्यं सम्पादयति।

पाठभागेऽस्मिन् कथापात्राणि तु घटोत्कचः, धृतराष्ट्रः, दुर्योधनः, शकुनिः, दुश्शासनः च सन्ति। एतेषां स्वभावविशेषताम् अधिकृत्य पाठभागात् अवगन्तुं शक्यते। अत्र मातृकारूपेण घटोत्कचस्य स्वभावनिरूपणं दीयते।

भासविरचितम् एकाङ्कनाटकं भवति दूतघटोत्कचम्। तस्मात् उद्धृतः भाग एव 'धीरो दूत' इति पाठभागः। नाटकस्यास्य प्रधानकथापात्रं भवति घटोत्कचः। सः भीमसेनस्य हिडिम्बायां जातः पुत्रः भवति। वनान्ते मात्रा सह वसन् सः पाण्डवकौरवयुद्धे पाण्डवपक्षे योद्धुम् उत्सुकः भवति। मात्रा पोषितोऽपि अस्य पितरि स्नेहः आदरः च वर्तते।

पाण्डवानां विजयार्थं प्राणान् परित्यक्तुमपि सिद्धः सः अर्जुनपुत्रस्य अभिमन्योः प्राणनष्टे महत् दुःखम् अनुभवति । यद्यपि वनौकाः सः नीतिबोधयुक्तः, अज्ञानुवर्ती, अर्पितचित्तः च भवति । श्रीकृष्णेन दूतत्वेन नियुक्तः घटोत्कचः कौरवभवने दूतस्य दायित्वम् उचितरीत्या निर्वहति। समे च स्वस्य पराक्रमं बाहुबलं च प्रदर्शयति। नाटकस्यास्य नायकोऽयं भीमपुत्रः धीरोदात्तः शक्तः वीरः च भवति।

**मूल्यनिर्णयसूचकानि**

आशयव्यक्तता । वाक्यघटना । औचित्यम् ।

(कथापात्ररनिरूपणावसरे श्रद्धेयाः आंशाः तु - नाटकस्य नाम, नाटककारस्य नाम, कथापात्रस्य प्राधान्यम् एते सन्ति। एते अंशाः अवश्यं प्रतिपादनीयाः। ततः कथापात्रस्य सामूहिकवीक्षणं, मनोभावाः च उचितरीत्या प्रतिपादनीयाः।)

**प्रवर्तनम् 5 प्रश्ननिर्माणम्**

पठनलक्ष्यम् - वाक्यात् प्रश्नकरणरीतिम् अवगच्छति।

पाठभागे सम्भाषणरूपेण दत्तेभ्यः वाक्येभ्यः प्रश्नवाचकशब्दान् (किम्, कः, का, कुत्र, कति, कदा. कुतः. कथम्, किमर्थम्) उपयुज्य यथाशक्यं प्रश्नान् निर्माति।

**मातृकाः** -

1. अर्जुनस्य पुत्रः कः?
2. पद्मव्यूहे कः मारितः अभवत् ?
3. दूतत्वेन कः नियुक्तः अभवत् ?
4. 'कल्याणः खलु अत्र भवान्' – कस्य वचनमिदम् ?

5. ‘आत्मबलाधानं कुरुष्व’ – अत्र कर्तृपदं किम् ?
6. समरकर्मणि कीदृशम् अष्टापदं युक्तं भवति ?
7. निशाचराः किं किं न कुर्वन्ति इति प्रतिपादितम् ?
8. ‘ज्याच्छेदात् दुर्वलोऽभिमन्युः नाहम्’ - अस्य वाक्यस्य प्रकरणार्थः कः ?
9. दूतघटोत्कचस्य नाटकस्य प्रतिपाद्यं किमस्ति ?
10. भासनाटकानि कति सन्ति ?

**मूल्यनिर्णयसूचकानि**

प्रश्नवाचकशब्दानां प्रयोगसाधुता । उचिता वाक्यघटना । अर्थावबोधः ।

**प्रवर्तनम् 6 नाटकानां तत्कर्तॄणां च पट्टिकाकरणम्**

पठनलक्ष्यम् - संस्कृतसाहित्यस्य नाटकानि तत्कर्तॄन् च परिचिनोति।

पाठभागे अनुबन्धे संस्कृतसाहित्यस्य दृश्यकाव्यानि अधिकृत्य लघुविवरणं दत्तमस्ति। तत्र कानिचन नाटकानि तथा तेषां कर्तारः च परामृष्टाः सन्ति । अनुबन्धं सश्रद्धं पठित्वा पट्टिकायाः उचितं पूरणं करोति ।

| **नाटकस्य नाम** | **कर्तुः नाम** |
|---|---|
| दूतवाक्यम् | भासः |
| अभिज्ञानशाकुन्तलम् | कालिदासः |
| मालतीमाधवम् | भवभूतिः |
| महावीरचरितम् | भवभूतिः |
| उत्तररामचरितम् | भवभूतिः |
| आश्चर्यचूडामणिः | शक्तिभद्रः |
| मत्तविलासप्रहसनम् | महेन्द्रविक्रमवर्मा |

**मूल्यनिर्णयसूचकानि**

आशयावगमनसामर्थ्यम् । चयनसामर्थ्यम् । उचितं पूरणम् ।

**अग्रिमपाठसंयोजकप्रवर्तनम्**

‘केरलीयसंस्कृतरूपकं कूटियाट्टम्’ इत्यस्ति संयोजकसूत्रवाक्यम् । संस्कृतरूपकमधिकृत्य पाठेऽस्मिन् अस्माभिः किञ्चित् अधीतम्। केरलेषु अपि कूटियाट्टम् इति संस्कृतरूपकस्य महत् पारम्पर्यं वर्तते । कूटियाट्टकलारूपेण सह वर्तमानं अन्यत् कलारूपं भवति कूत्त्। चाक्यार् कूत्त् इति भवद्भिः श्रुतं स्यात् । चाक्यार् कूत्त् कलारूपस्य साहित्यमधिकृत्य भवति अग्रिमः पाठः ।

## अनुबन्धः

**भासः**

संस्कृतसाहित्यकारेषु अतिप्राचीनः प्रतिभासम्पन्नः कविपुङ्गवः भवति भासः। भारतीयनाटककारेषु कालादासादपि पूर्वं संस्कृतदृश्यकाव्यसम्पदः कृते नैकाः रचनाः कलितवतः अस्य महाकवेः कालः क्रिस्तोः पूर्वं चतुर्थशतकं भवितुमर्हतीति सामान्येन पण्डिताः वदन्ति। तस्मिन् विषये मतैक्यं नास्ति। केचन क्रिस्तोः पूर्वं पञ्चमशतकात् क्रिस्तोः परं चतुर्थशतकं यावत् इति च कथयन्ति।

1912 तमे वर्षे भारतीयेन संस्कृतगवेषकेण गणपतिशास्त्रिणा त्रयोदश भासनाटकानि परिदृश्य प्रकाशितानि। तद्यावत् भासनाटकानि विनष्टानि इव आसन्। नाट्यशास्त्ररचनायाः पूर्वमेव भासेन नाटकानि रचितानि इत्यस्मात् नाट्यशास्त्रनियमाः पूर्णरूपेण भासनाटकेषु न पालिताः।

भासस्य ललिता रचनाशैली वर्तते। अनुवाचकेषु आस्वादनस्य अनुभूतिं सद्य एव निवेशयितुं सा शैली अतीव सहायिका भवति। कालिदासनाटकापेक्षया भासनाटकानाम् आस्वादकाः अधिकाः सन्तीति केचन अभिप्रयन्ति।

**दूतघटोत्कचम्**

भासस्य त्रयोदशनाटकेषु प्रसिद्धम् अन्यतमं नाटकं भवति दूतघटोत्कचम्। महाभारतस्य युद्धपर्वणः घटनायाः आधारेण विरचिता कल्पितकथा भवति दूतघटोत्कचस्य इतिवृत्तम्।

जयद्रथस्य नेतृत्वे पद्मव्यूहे युद्धनियमान् उल्लङ्घ्य कौरवसेना अर्जुनपुत्रम् अभिमन्युं मारयति। पाण्डवाः अतीव दुःखिताः भवन्ति। अर्जुनः कौरवान् सर्वान् निश्शेषं करिष्यतीति दृढप्रतिज्ञां स्वीकरोति। किन्तु कौरवपक्षे अभिमन्योः वधः सम्मिश्राभिप्रायस्य कारणमभवत्। नाटकेऽस्मिन् गान्धारी, दुश्शला, धृतराष्ट्रः इत्येतानि कथापात्राणि तस्य वधं साधूकर्तुं न शक्यते इति अभिप्रयन्ति। किन्तु इतरे दुश्शासनः दुर्योधनः, शकुनिः प्रभृतयः अभिमन्योः वधम् आह्लादकं कुर्वन्ति।

श्रीकृष्णस्य निर्देशेन भीमपुत्रः घटोत्कचः कौरवमन्दिरं गत्वा अर्जुनस्य दृढप्रतिज्ञामभिमुखीकर्तुं सिद्धाः भवन्तु इति सन्देशं ज्ञापयति। तदानीं तं बद्धुं मारयितुं च कौरवाः यतन्ते। किन्तु धृतराष्ट्रस्य उचितसमीपनेन रङ्गः शान्तः अभवत्। ततः घटोत्कचः निष्क्रामति च।

भासस्य दूतवाक्ये नाटके विद्यमानः संघर्षसन्दर्भः अस्मिन् नाटके च द्रष्टुं शक्यते। उभयत्र च दूतं बद्धुं कौरवाः यतन्ते तथा धृतराष्ट्रः सर्वान् शान्तान् करोति च। उभयत्र वीररस एव प्रधानः।

दूतघटोत्कचे भरतवाक्यं न विद्यते अथवा नाटकमिदं पूर्णं न भवतीति कथ्यते। घटोत्कचं प्रधानकथापात्रत्वेन प्रकल्प्य भासेन विरचितं नाटकान्तरं भवति मध्यमव्यायोगः। भासविरचितानि नाटकानि केरलीयसंस्कृतरूपके कूटियाट्टे उपयुज्यन्ते च।

**अधिकविस्तरः**

न तु जतुगृहे सुप्तान् भ्रातॄन् दहन्ति  निशाचराः
शिरसि न तथा भ्रातुः पत्नीं स्पृशन्ति निशाचराः।
न च सुतवधं सङ्ख्ये वृत्तं स्मरन्ति निशाचराः
विकृतवपुषोऽप्युग्रचारा घृणा न तु वर्जिता॥

अस्मिन् श्लोके कौरवैः कृताः अनर्थाः परामृष्टाः। कक्ष्यायां सः सन्दर्भः च अध्यापकेन बोधनीयः भवति ।

कौरवाणां पाण्डवेषु विद्यमाना शत्रुता सुविदिता खलु। पाण्डोः मरणानन्तरं कुन्तीं पञ्चपुत्रान् च भीष्मः हस्तिनपुरमानीय पालितवान्। ततः युधिष्ठिरः युवराजत्वेन अभिषिक्तः अकारि। तस्मिन् अप्रीतः दुर्योधनः धृतराष्ट्रमुपेत्य पाण्डवेभ्यः अन्यत् राजमन्दिरं प्रदेयमिति असूचयत् । तदनुसारं वारणावते नूतनं राजमन्दिरं पाण्डवेभ्यः निर्मितम् । तन्मन्दिरं पूर्णतया जतुविशेषेण वस्तुना निर्मितं भवति। तत्र पाण्डवाः कुन्तीदेवी च वस्तुं आरभन्त। तदानीं कौरवाः सोदरान् पाण्डवान् मारयितुं जतुगृहं भस्मीचकार । सः सन्दर्भःएव घटोत्कचेन अत्र सूचितः।

द्यूतक्रीडायां कौरवैः पराभूताः अभवन्। युधिष्ठिरः राज्यं, सोदरान्, पाञ्चालीं च पणीकृत्य एव क्रीडाम् अकरोत्। पणीभूतायाः द्रौपद्याः अवमाननं लक्षीकृत्य दुर्योधनस्य निर्देशानुसारं दुश्शासनः तां वेण्यां गृहीत्वा सभायां बलादाक्षिप्य आनीतवान् । ततः वस्त्राक्षेपं च कृतवान्। सः सन्दर्भः द्वितीयपङ्क्तौ परामृष्टः।

तृतीयपङ्क्तौ तु पद्मव्यूहे वञ्चनया मारितं अभिमन्युमेव सूचयति। सः सन्दर्भः पाठभागे च परामृश्यते इत्यस्मात् अत्र न विशदीक्रियते । एताः प्रवृत्तयः कौरवाणां क्रूरतां एव प्रकाशयन्ति। तदपेक्षया आकारेण विकृताः निशाचराः कदापि निर्घृणाः न भवन्तीति सारम्।